

SHIKSHADHARA

# शिक्षाधारा

## शिक्षाविभागस्य वार्षिकपत्रिका


राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः

राजीवगान्धीपरिसरः

शृङ्गेरी - 577 139, कर्णाटकराज्यम्

2017-18

SHIKSHADHARA

# शिक्षाधारा

शिक्षाविभागस्य वार्षिकपत्रिका


अधीक्षकः

आचार्यः ए.पि. सच्चिदानन्दः

प्रधानसम्पादकः

डा. चन्द्रकान्तः

सम्पादकौ

डा. हरिप्रसादः के.

डा. पि. अरविन्दकुमारसोमदत्तः



राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः

राजीवगान्धीपरिसरः

शृङ्गेरी – 577 139, कर्णाटकराज्यम्

2017–18

Name of the Magazine : SHIKSHADHARA

© Department of Shiksha shastra
RASTRIYA SANSKRIT SANSTHAN
(Deemed University)
Rajiv Gandhi Campus, Menase, SRINGERI
Chikkamagalur Karnataka – 577139

Year of Publication : 2018
No. of Copies : 150

Published by : Department of Shiksha Shastra
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University)
Rajiv Gandhi Campus, Menase, SRINGERI
Chikkamagalur Karnataka – 577139

Designed by : Students of Shiksha Shastri
Rajiv Gandhi Campus, Sringeri

Printed At : Siri Enterprises, Sringeri

* All rights are reserved for the Department and Writers are responsible for their respective articles.

# शुभाशंसनम्



“**ज्ञानं नराणाम् अधिको विशेषः**” इत्युक्त्या सिद्धमिदं यत् ज्ञानवत्वं नराणां विशिष्टं लक्षणमिति । अतो मानवैः तज्ज्ञानं समुचितरूपेण प्राप्तुं तदीयं विशदं रूपं विज्ञातुं च विश्वे सर्वत्र प्रयासः सततं विहितः । अत्र देशे सत्यज्ञानान्वेषकाः मन्वादयो महर्षयः, श्रीशङ्कराचार्यादयः आचार्याः वेदार्थतत्त्वं विज्ञाय ज्ञातव्यस्य ज्ञानस्य स्वरूपमवर्णयन् । विदेशेषु साक्रटिस्-प्लेटो-रूसो-प्रभृतयोऽपि शिक्षादर्शनमिति नवाविष्कारं प्रणिन्युः ।

शिक्षायाः दार्शनिकः, समाजिकः, मनोवैज्ञानिकः, वैज्ञानिकः, प्राविधिक इत्याद्यनेके विचाराः अद्य प्राज्ञैर्निरूपिता, एतेषां सर्वेषां ज्ञानं शिक्षकस्य कृते नितान्तमावश्यकमिति मत्वा राष्ट्रेण शिक्षशास्त्रस्य प्रसारे महान् श्रमः कृतोऽस्ति । तद्दिशि राष्ट्रियसंस्कृतसंस्थानान्तर्गतराजीवगान्धीपरिसरेणापि महत्या श्रद्धया शिक्षाशास्त्रविषयकपाठनेन सह पाठ्येतरकार्याणि च सम्पाद्यन्ते । तत्र शिक्षाविभागीयैः प्राध्यापकैः छात्रैश्च मिलित्वा बहुभाषाभूयिष्ठेयं शिक्षाधारानाम्नी शिक्षाशास्त्रविभागीया वार्षिकपत्रिका मनोज्ञया शैल्या सम्पादितास्तीति विज्ञाय मोमुदीति नश्चेतः ।

एतस्मिन् पत्रिकासम्पादनकर्मणि सततं परिश्रमं कृतवद्भ्यां डा. हरिप्रसादः के. डा. अरविन्दकुमारसोमदत्त इत्येताभ्यां, मार्गदर्शनं दत्तवद्भ्यः शिक्षाशास्त्रविभागाध्यक्षेभ्यः डा. चन्द्रकान्तवर्येभ्यः, सहकृतवद्भ्यः विभागीयप्राध्यापकेभ्यः, छात्रेभ्यश्च शं कमये ।

सर्वान्ते सन्दर्भेऽस्मिन् शरदिन्दुसन्निभायाः शारदाम्बायाः, सुधांशुकलितोत्तमाङ्गस्य चन्द्रमौलीश्वरस्य, श्रीमज्जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां श्री श्री विधुशेखरमहास्वामिनाञ्च चरणकमलेषु प्रणतिततीः समर्पयामि ।

विलम्बचैत्रकृष्णाष्टमी रविवासरः

०८-०४-२०१८

विद्वज्जनविधेयः

प्रो. ए.पि.सच्चिदानन्दः

प्राचार्यः (प्र)

## प्रवहतात् सततं शिक्षाधारा



सर्वस्यापि कर्मणः उपक्रमोपसंहारयोः परस्परं पूरकेण सम्बन्धेन विशेषतः फलप्रदं कर्म सिध्यतीति सत्सम्प्रदायः । तथैव शिक्षणसत्रमपि ज्ञानसम्पादनात्मकं कर्म भवति । तस्मात् अस्थायिशैक्षिकसत्रस्य उपक्रमोपसंहारौ प्रधानौ सत्रसाफल्यार्थे भवतः । अस्यां दिशि हेमलम्बसंवत्सरस्य सत्रे सत्रोद्घाटनेन उपक्रम्य अनुष्ठितानि सर्वाणि ज्ञानसम्पादनात्मकानि कर्माणि शिक्षाशास्त्रमधीयानानां छात्राध्यापकानां विलम्बसंवत्सरे अविलम्बानि फलदायीनि चाभूवन्निति सहर्षं आम्रेडयामः । अपि च शिक्षाशास्त्रविभागे नैकविधानां व्यावसायिकक्षमतोन्नायनकार्यक्रमाणां सञ्चालनेन सह शिक्षाधारानाम्नी शैक्षिकपत्रिका अपि प्राकाश्यं नीयते इति साभिमानं ब्रूमः । किञ्च अध्यापकच्छात्रलेखसंवलिता पत्रिकेयं सत्रस्यास्य उपसंहारकाले आविष्क्रियते इत्यपि महत् प्रमोदस्थानम् । पत्रिकायाः अस्याः सुचारुसम्पादनादि कर्म विधातुं प्रेरणां प्रदत्तवद्भ्यः ज्येष्ठेभ्यः सर्वेभ्यः कार्तज्ञ्यमभिव्यज्य तत्साधितवतः सर्वान् साधुवादैरभिनन्दामि ।

विलम्बचैत्रकृष्णद्वादशी गुरुवासरः

१२-०४-२०१८

विद्वज्जनवशंवदः

डा.चन्द्रकान्तः

विभागाध्यक्षः, शिक्षाविभागः

# सम्पादकीयम्

श्रियः प्रदुग्धे विपदो रुणद्धि यशांसि सूते मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः किल कामधेनुः ॥

इत्थं सुभाषितमिदं विद्यायाः महिमानम् कीर्तयति । परमपुरुषार्थत्वेन मोक्षं परिगृह्य तत्साधयितुं "ज्ञानेनैव हि कैवल्यम्" इत्युक्त्यनुसारं ज्ञानमार्गेणैव प्रवृत्ताः सन्तः अस्मन्मनीषिणः लोकाय सत्पथं प्रादर्शयन् । भारते प्राचीनकालादारभ्य विद्याविषयकप्रीतिः अस्मत्पूर्वजेषु कीदृशी आसीदिति एभिरुक्तिभिः स्पष्टं भवति ।

परमपुरुषार्थं मोक्षं किञ्चिदिव दूरे निक्षिप्य विचारयामः चेदपि व्यावहारिकप्रपञ्चे यत्किमपि साधयितुं विद्याधनं सर्वधनप्रधानं भवति । सैव विद्या शिक्षया साम्प्रतं सम्पाद्यते । शिक्षा अस्माकं जीवनं सुखमयं शान्तियुक्तं करोति । अत एव तत्प्राप्तये सर्वेषां मानवानां प्रवृत्तिर्जायते ।

आधुनिकशिक्षायाः लक्ष्यं बालकस्य सर्वाङ्गिकविकासो वर्तते । सर्वाङ्गिकविकासः तदैव भवति यदा शैक्षिकसंस्थासु तदनुकूलव्यवस्था कल्प्यते । अध्ययनाध्यापनक्रिये अतिरिच्य छात्रस्य विकासार्थं अन्यविधक्रियाकलापाः संयोजनीयाः येषां कारणतः छात्रः बहुमुखीविकासं प्राप्तुमर्हति । शैक्षिकसंस्थासु सञ्चाल्यमानाः अन्यविधक्रियाकलापाः पाठ्यसहगामिक्रिया इति उच्यन्ते । तासु पाठ्यसहगामिक्रियासु शैक्षिकपत्रिकासज्जीकरणमपि काचित् विशिष्टा क्रिया भवति यया छात्राणां लेखनसामर्थ्यस्य प्रदर्शनं कर्तुं अवसरः कल्प्यते । ईदृशोद्देश्यं मनसि निधाय शिक्षाशास्त्रविभागे गतेभ्यः त्रयोदशवर्षेभ्यः शिक्षाधारानाम्नी काचित् शैक्षिकवार्षिकी पत्रिका प्राकाश्यं नीयते । अस्मिन्नपि हायने तत्पन्थानमनुसृत्य पत्रिका सज्जीकृता वर्तते । अस्याः पत्रिकायाः मूर्तरूपावाप्तेः परमनिधानभूताः भवन्ति श्रीमज्जगद्गुरूणां भारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां विधुशेखरभारतीमहास्वामिनाञ्च आशिषः, जगदम्बायाः शारदाम्बायाः कृपा च । अतः तदीयचरणकमलेषु अस्माकं प्रणतिप्रसूनानि समर्पयावः ।

पत्रिका समये सुष्ठु च प्रकाश्येत इत्येतदर्थं अस्मप्राचार्याः आचार्याः सच्चिदानन्द उडुपवर्याः अवां सम्प्रेर्य अन्वग्रहीषुः । अतः तेभ्योऽत्र कार्तज्ञ्यकुसुमानि समर्पयावः । अस्माकं विभागाध्यक्षाः डा.चन्द्रकान्तवर्याः समये समये मार्गदर्शनं विधाय पत्रिकायाः सुष्ठु सम्पादने साहाय्यं व्यदधुः । अतस्तेभ्यः हार्दिकीं कृतज्ञतां प्रकटयावः ।

विभागीयाः सर्वेऽपि प्राध्यापकाः यथापेक्षं साहाय्यमकार्षुरित्यतः तानावां मानयावः। एवमेव अस्याः पत्रिकायाः सम्पादनकर्मणि साहाय्यं विहितवन्तः बहवो हि शिक्षाशास्त्रिप्रथमद्वितीयवर्षच्छात्राः भृशं साधुवादैः अभिनन्द्यन्ते।

पत्रिकाया अस्याः पुटसज्जीकरणादिकं कृत्वा अस्मत्साहाय्यं व्यधासीत् सङ्गणकप्राध्यापकः श्रीमान् शशिधरवर्यः। मुद्रणं सुष्ठु विहितवान् श्रीकान्तवर्यः। अनयोः कृते कार्तज्ञ्यं वितरावः।

इत्थं विद्वद्विधेयौ

डा. हरिप्रसादः के

डा. अरविन्द कुमार सोमदत्तः

# शिक्षाविभागः



Dr. Chandrakant
Head of the Department



Dr. Ramachandrula Balaji
Asst. Professor



Dr. Hariprasad K
Asst. Professor



Dr. Ganesh T. Pandit
Asst. Professor



Dr. Venkataraman Bhat
Asst. Professor



Dr. Narayana Vaidya
Guest Teacher



Dr. Aravinda K Somadutt
Guest Teacher

# EDITORIAL BOARD



Prof. A.P. Sachidananda
Principal



Dr. Chandrakant
Chief Editor

Editors



Dr. Hariprasad



Dr. Aravinda Kumar Somadutt

## PUPIL TEACHERS' EDITORIAL BOARD



Prashant
Shikshashastri II



Priyadarshini Panda
Shikshashastri II



Ganesh A Bhat
Shikshashastri II



Mamatha Padhan
Shikshashastri II

## कार्यालयीया: सदस्या:



श्रीमती सीतालक्ष्मी:
अनुभागाधिकारिणी



श्री एस्. के. महापात्र:
कार्यालयसहायक:



श्री गुरुराजभट्ट:
यू. डि. सि.



श्री एस्. आर्. चन्द्रशेखर:
एल्. डि. सि.



श्रीमती मञ्जुळा
एल्. डि. सि.

## ग्रन्थालय:



श्री बेनुधरमोहापात्र:
सहायकग्रन्थपाल: (सं)



श्री दिनेश:
एम्. टि. एस्.





श्रीमती सिद्दम्मा
एम्. टि. एस्.



श्रीमती श्रीगौरी
डि. इ. ओ. (बा. सं)



श्रीमती शुभा
एम्. टि. एस्. (बा. सं)


**श्रीमती सौम्या**
डि. ई. ओ. (बा. सं)


**श्री कुमारः**
एम्. टि. एस्.


**श्री शिवण्णः**
एम्. टि. एस्.


**श्री एम्. रफीकः**
एम्. टि. एस्.


**श्रीमती जयम्मा**
स्वच्छताकर्मचारिणी


**श्रीमती सावित्री**
छात्रावासनिरीक्षिका (बा. सं)


**रश्मी एस्.**
छात्रावासनिरीक्षिका (बा. सं)


**श्री उमेशः**
छात्रावाससहायकः (बा. सं)


**श्री लोकेशः**
छात्रावाससहायकः (बा. सं)


**श्रीमती तिम्मम्मा**
स्वच्छताकर्मचारिणी (बा. सं)


**श्रीमती अन्नपूर्णा**
स्वच्छताकर्मचारिणी (बा. सं)


**श्रीमती पार्वती**
स्वच्छताकर्मचारिणी (बा. सं)


**श्रीमती पद्मा**
स्वच्छताकर्मचारिणी (बा. सं)


**श्रीमती सुन्दरी**
स्वच्छताकर्मचारिणी (बा. सं)


**श्री नागेशः**
उद्यानपालकः (बा. सं)


**श्री एम्. बि. शङ्कर्**
रक्षणकर्मचारी (बा. सं)


**श्री सदाशिवः**
रक्षणकर्मचारी (बा. सं)


**श्री के. चन्द्रप्पः**
रक्षणकर्मचारी (बा. सं)


**श्री एम्. के. राजुः**
रक्षणकर्मचारी (बा. सं)


**श्री सि. रविः**
रक्षणकर्मचारी (बा. सं)


**श्री एम्. वी. महेशः**
रक्षणकर्मचारी (बा. सं)


**श्री अप्पय्याचारि**
रक्षणकर्मचारी (बा. सं)


**श्री सुब्रह्मण्यः**
रक्षणकर्मचारी (बा. सं)


**श्री चन्द्रशेखरः**
रक्षणकर्मचारी (बा. सं)

# सहकारः

शिक्षाशास्त्रिकक्ष्यायाः नैके छात्राः पत्रिकायाः सुचारुसम्पादनकर्मणि स्वीयं योगदानं विभिन्नरूपेण प्रायच्छन् । तेषां विवरणम् इत्थं वर्तते -

## प्रथमवर्षीयाः

| उत्तरदायित्वानि | नामानि |
|---|---|
| II Proof of all Sanskrit Articles | Ganesh Anant Bhat |
| | Mrutyunjaya Shastri |
| | Vinay Kumar Bhagavat |
| I Proof of Sanskrit Articles of Boys | Pinku Sahu |
| | Durga Shankar Panda |
| I & II Proof of All Hindi Articles | Navdeep Sharma |
| | Neeraj Pant |
| I Proof of Sanskrit Articles of Girls | Greeshma N. T. |
| | Mamata Padhan |
| I & II Proof of Kannada Articles | Lakshmikanta Bhat<br>Venkatesha Anant Hegde |
| Typing | Adarsha |
| | Shreepati Bhat |
| Collection of Suktis | Rahul Mishra |
| | Tosh Kumar |
| Collecting the articles from students and Distributing the same to proof readers | Ajith C |

| | |
|---|---|
| Collecting the Address, Phone number and Photographs of students | Nagaraj Joshi |
| Collecting the Sandeshas of VC, Principal and HOD | Aditya H.G. |
| Collection of Student Achievement | Haradhan Jal, |
| | Chandan Moaharana |
| Satravivaranam | Hanumantaraya K. D. |
| Preparation of Cover Page and Collection of Photographs of all events | Agneya Bhat |

## द्वितीयवर्षीयाः

| Sl.No. | Responsibilities | Name of the Student |
|---|---|---|
| 1 | II Proof of all Sanskrit Articles of I & and II year Students | Balachandra Bhat |
| 2 | | Sudarshana Bhat |
| 3 | I & II Proof of All Hindi Articles | Ajit |
| 4 | | Vinod Kumar Jain |
| 5 | I Proof of Sanskrit Articles of Girls | Meghashree |
| 6 | | Kavita G Bhat |
| 7 | I & II Proof of All Kannada Articles | Ganapati |
| 8 | Typing | Venkatesh G |

# सत्रविवरणम्

**उद्घाटनम्**

श्री शारदाम्बायाः परिपूर्णकृपाकटाक्षैः श्री श्री भारतीतीर्थमहास्वामिनां श्री श्री विधुशेखरभारतीमहास्वामिनाञ्च अनुग्रहविशेषैः अस्मत्कुलपतीनामाचार्याणां प्रो॥ परमेश्वरनारायणशास्त्रिवर्याणां शुभाशीर्भिः शृङ्गगिरिक्षेत्रे विराजमानस्य राजीवगान्धीपरिसरस्य शिक्षाशास्त्रिविभागस्य २०१७-२०१८ शैक्षिकसत्रं ०५-०७-२०१७ तमे दिनाङ्के परिसरप्राचार्याः प्रो॥ सच्चिदानन्द उडुपवर्याः समुदघाटयन् । कार्यक्रमेऽस्मिन् शिक्षाशास्त्रविभागस्य विभागाध्यक्षाः डा॥ चन्द्रकान्तमहोदयाः, प्राध्यापकाः डा॥ रामचन्द्रुलबालाजिवर्याः, प्राध्यापकाः डा॥ हरिप्रसादमहोदयाः, कक्षाध्यापकाः प्राध्यापकाः डा॥ गणेश टि पण्डितमहाभागाः, प्राध्यापकाः डा॥ वेङ्कटरमण एस् भट्टमहाशयाः, अतिथिप्राध्यापकाः डा॥ नारायण वैद्यमहाभागाः, अतिथिप्राध्यापकाः डा॥ अरविन्दकुमार सोमदत्तवर्याश्च समुपस्थिता आसन् ।

**संस्कृतसम्भाषणवर्गः**

शिक्षाशास्त्रिच्छात्राणां संस्कृतसम्भाषणक्षमतायाः वर्धनार्थं जुलैमासस्य ३१ तमदिनाङ्कादारभ्य आगष्टमासस्य ११ दिनाङ्कपर्यन्तं दशदिनानि संस्कृतसम्भाषणवर्गः समभवत् । श्रीमती मङ्गलगौरीवर्या वर्गसञ्चालनमकरोत् । अस्य वर्गस्य समारोहकार्यक्रमः आगष्टमासस्य २२ दिनाङ्के अभवत् । अस्य समारोहस्य अध्यक्षाः परिसरस्यास्य प्राचार्याः प्रो॥ सच्चिदानन्द उडुपवर्याः आसन् ।

**भाषाबोधनवर्गः**

शिक्षाशास्त्रिच्छात्राणां भाषाकौशलसम्पादनार्थं भाषाबोधनवर्गः आगष्टमासस्य १४ दिनाङ्कादारभ्य २२ पर्यन्तं प्राचलत् । श्री उमामहेश्वरमहोदयेन वर्गस्यास्य चालनं कृतम् । २२ दिनाङ्के वर्गस्यास्य समापनकार्यक्रमः अजायत ।

**साप्ताहिकसङ्गोष्ठी**

प्रशिक्षणाङ्गत्वेन कौशलविकासाय प्रति शनिवासरं निश्चितविषयेषु गोष्ठ्यः सञ्चालिताः ।

**हिन्दीसप्ताहः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनाय अक्टोबरमासस्य ४ दिनाङ्कतः ६ दिनाङ्कपर्यन्तं हिन्दीसप्ताहः समाचरितः । हिन्दीसप्ताहेऽस्मिन् चतस्रः स्पर्धाः समायोजिताः आसन् । ४ दिनाङ्के आशुभाषणस्पर्धा, ५ दिनाङ्के निबन्धलेखनस्पर्धा, ६ दिनाङ्कस्य प्रातः ११ वादनतः १ वादनपर्यन्तं गीतगायनप्रतियोगिता, अपराह्ने वादविवादप्रतियोगिता च प्रचलिता आसीत् ।

**शिक्षणाभ्यासः**

शिक्षाशास्त्रिद्वितीयवर्षीयाणां छात्राध्यापकानां मासचतुष्टयात्मकः शिक्षणाभ्यासः संवत्सरेऽस्मिन् सेप्टम्बरमासस्य प्रथमदिनाङ्कतः दिसेम्बरमासस्य त्रयोदशदिनाङ्कं यावत् चक्रद्वये प्रावर्तत ।

**संस्कृतसप्ताहः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनाय अक्टोबरमासस्य १० दिनाङ्कतः १३ दिनाङ्कपर्यन्तं संस्कृतसप्ताहः समाचरितः । अस्मिन् सप्ताहे चतस्रः स्पर्धाः आयोजिताः आसन् । १० दिनाङ्के संस्कृताशुभाषणप्रतियोगिता, ११ दिनाङ्के निबन्धलेखनप्रतियोगिता, १२ दिनाङ्के वादविवादप्रतियोगिता, १३ दिनाङ्के श्रीमद्भगवद्गीताकण्ठपाठस्पर्धाश्च समायोजिताः आसन् ।

**सांस्कृतिकस्पर्धाः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनाय अक्टोबर्मासस्य २३ तः २५ पर्यन्तं सांस्कृतिकस्पर्धाः समभवन् । चतस्रः स्पर्धाः आयोजिताः अभूवन् । २३ दिनाङ्कस्य प्रातः गीतगायनस्पर्धा, अपराह्णे लघुरूपकस्पर्धा, २५ दिनाङ्कस्य प्रातः रङ्गवल्लीनिर्माणस्पर्धा अपराह्णे सामूहिकनृत्यस्पर्धाश्च आयोजिताः अभूवन् ।

**विद्यालयावबोधः**

हायनेऽस्मिन् शृङ्गेरी, तोरेहड्लु, हरिहरपुरं, कोप्पा इत्यत्र विद्यमानासु प्रौढशालासु ड्िसेम्बरमासस्य ४ दिनाङ्कतः ९ दिनाङ्कपर्यन्तं छात्राध्यापकानां विद्यालयावबोधः प्राचलत् । शिक्षाशास्त्रिप्रथमवर्षीयाः छात्राः अत्र भागमगृह्णन् ।

**प्रशिक्षणवर्गः**

हायनेऽस्मिन् डिसेम्बरमासस्य १२ दिनाङ्कतः २२ दिनाङ्कपर्यन्तं संस्कृतसम्भाषणशिबिरसञ्चालनकौशलान्यवाप्तुं प्रशिक्षणवर्गः समजनि । अत्र सर्वेऽपि शिक्षाशात्रिच्छात्राध्यापकाः शिबिरसञ्चालनप्रशिक्षणं प्राप्तवन्तः ।

**संस्कृतसम्भाषणशिबिरम्**

हायनेऽस्मिन् जनवरीमासस्य ८ दिनाङ्कतः १९ दिनाङ्कपर्यन्तं कोप्पा, हरिपुरं, एन्.आर्.पुरं, शृङ्गेरी इत्यत्र विद्यालयेषु, महाविद्यालयेषु समाजे च संस्कृतसम्भाषणशिबिरसञ्चालनं शिक्षाशास्त्रछात्राः अकार्षुः ।

**शोभायात्रा- वीथीनाटकञ्च**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन शोभायात्रा-वीथीनाटकञ्च जनवरीमासस्य २१ दिनाङ्के कोप्पानगरे जिल्लासम्मेलनावसरे समभवत् ।

**क्रीडास्पर्धाः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन क्रीडास्पर्धाः फेब्रवरीमासस्य १५ तः १६ पर्यन्तं समभवन् ।

**द्व्यह्निकी राष्ट्रियसङ्गोष्ठी**

शिक्षाशास्त्रविभागस्य द्व्यह्निकी राष्ट्रियसङ्गोष्ठी फेब्रवरीमासस्य २४,२५ दिनाङ्कयोः समजनि । अस्यां सङ्गोष्ठ्यां समावेशात्मकशिक्षा विषये बहवः पर्यभाषन्त ।

**स्वच्छताभियानम्**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य स्वच्छताभियानं मार्चमासस्य १४ दिनाङ्के अस्माकं परिसरे अभवत् ।

**सामान्यसङ्गणकज्ञानप्रशिक्षणवर्गः**

शिक्षाशास्त्रिछात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन सामान्यसङ्गणकज्ञानप्रशिक्षणवर्गः मार्चमासस्य १६,१९,२२ दिनाङ्केषु समभवत् । वर्गेऽस्मिन् सङ्गणकप्राध्यापकाः श्री शशिधर के वि महोदयाः सुचारु अबोधयन् ।

**चित्रकलाप्रशिक्षणवर्गः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन चित्रकलानिर्माणं, मृच्छिल्पमूर्तिनिर्माणं, रचनात्मककार्यक्रमादीनाञ्च वर्गाः समभवन् । वर्गेऽस्मिन् श्री वागीशवर्याः प्राबोधयन् । वर्गस्यस्य संयोजकाः डा॥ गणेश टि पण्डितवर्याः आसन् ।

**संस्कृत-विकिपीडिया-कार्यशाला**

शिक्षाशास्त्रप्रथमवर्षीय-व्यावसायिकक्षमतोन्नयनकार्यक्रमान्तर्गतत्वेन संस्कृतविकिपीडिया-कार्यशाला ५/०४/२०१८ तमे दिनाङ्के सम्पन्ना । बेङ्गळुरुनगरस्थस्य अक्षरकार्यालयस्य संस्कृतविकिपीडियापरियोजनाप्रमुखाः श्रीमत्यः शुभा डि.वर्याः अस्माकं शिक्षाशास्त्रिच्छात्रान् संस्कृतविकिपीडिया इत्यस्मिन् विषये उदबोधयन् । अन्तर्जालमाध्यमेन संस्कृतप्रपञ्चस्य समग्रविवरणप्रदात्री संस्कृतविकिपीडिया अवश्यं सर्वैरपि संस्कृतज्ञैः छात्रैश्च उद्घाट्य द्रष्टव्या । किञ्च तत्र सम्पादनकार्याणि च करणीयानीति आग्रहं कृतवत्यः । संस्कृतविकिपीडिया कथं कार्यं करोति ? तत्र कार्यकरणाय के के विभागाः सन्ति ? तत्र कार्यकरणशैली का ? सम्पादनकार्याणि कथं कर्तव्यानि ? तत्र अवधेयाः अंशाः के ? इत्यादीनां विषये

विस्तरेण प्रयोगपुरस्सरं विवरणं प्रायच्छन् । सङ्गणकप्रयोगशालायामपि छात्रान् नीत्वा सम्पादनकार्यस्य प्रायोगिकम् अनुभवं उत्पादयितुं प्रयत्नो विहितः ।

विभागाध्यक्षाः डा. चन्द्रकान्तवर्याः वर्गस्य ज्येष्ठाः प्राध्यापकाः डा.रा.बालाजिवर्याः संयोजकाः डा. हरिप्रसादवर्याः अन्ये प्राध्यापकाश्च कार्यशालायामस्यां उपातिष्ठन्त । दिनान्ते व्याख्यातुं आगतवतीनां श्रीमती.शुभा डि.वर्याणां सम्माननकार्यक्रमेण सह पूर्वं सम्पादितानां व्यावसायिकक्षमतोन्नयनकार्यक्रमाणां प्रमाणपत्राणि छात्रेभ्यः वितीर्णानि ।

# विषयानुक्रमणिका

## संस्कृतधारा


| अ.क्र | लेखः | लेखकः | पुटसंख्या |
|---|---|---|---|
| 1 | वेदेषु पर्यावरणविज्ञानम् | डा.चन्द्रकान्तः | 01 |
| 2 | शास्त्रशिक्षणार्थं सङ्गणकसहकृतशिक्षणप्रतिमानानि | डा. हरिप्रसादः के | 04 |
| 3 | अधिगम प्रकारा: | डा.गणेश ति. पण्डित: | 06 |
| 4 | शिक्षाया: दर्शनक्षेत्रे प्रभाव: | डा. नारयणवैद्य: | 08 |
| 5 | मानसिकरूपेण मन्दबालका: | डा. अरविन्दकुमार सोमदत्त: | 10 |
| 6 | वेदेषुपर्यावरणस्यविवेचनम् | प्रियतमासेटी | 11 |
| 7 | पर्यावरणशिक्षा | हीरामणिमहन्त | 13 |
| 8 | सत्यवादीवनविद्यालयस्य शिक्षाव्यवस्था | दुर्गाशंकरपण्डा | 14 |
| 9 | भारते मूल्याधारितशिक्षा | दिपिन् घडै | 16 |
| 10 | दैनन्दिनी | ग्रीष्मा N.T. | 17 |
| 11 | बुद्धि:(INTERLLIGENCE) | तोषकुमारसाहु | 18 |
| 12 | मूल्यशिक्षायाः स्वरूपम् | ज्योतिर्मयी परिडा | 20 |
| 13 | गीतायांआदर्शव्यक्तित्वस्यकल्पना | हरस्मिताराउत | 23 |
| 14 | भारतीयशिक्षाधिनियमः - १८३५ | राहुलमिश्र: | 24 |
| 15 | शिक्षायाःमहत्वम् | जचिन्द्रकुमार् बेहरा | 26 |
| 16 | कर्मणिएवअधिकारः | रजनीगन्धासाहु | 27 |
| 17 | शिक्षा | राज्कुमारीकुजुर | 28 |
| 18 | श्रीमद्भगवद्गीतायांशिक्षायाःमहत्त्वम् | सीमालाक्रा | 29 |
| 19 | सम्स्कृतसाहित्ये जीवनमूल्यानि | मृत्युञ्जयशास्त्री | 30 |
| 20 | ज्ञानं विज्ञानसहितम् | दिप्तिमयीदास | 32 |
| 21 | आधुनिकभारतेशैक्षिकप्रविधेःआवश्यकता | दीप्तीशकुमारशतपथी | 33 |

| | | | |
|---|---|---|---|
| 22 | शिक्षायाः अन्तर्भूताङ्गानि | सन्जयकुमार साहु | 35 |
| 23 | स्त्रीशिक्षायाःआवश्यकता | अरुणगर्डिआ | 36 |
| 24 | शिक्षा | आदित्य.हेच्.जि | 37 |
| 25 | अनुशासनम्(DISCIPLINE) | उदयनाथ पधान | 39 |
| 26 | शिक्षायाःस्वरुपम् | मधुमितासाहु | 40 |
| 27 | शैक्षिकसमाजशास्त्रम् | जयदेवसाहु | 42 |
| 28 | मदनमोहनमालवीयस्य शिक्षादर्शनम् | विपिन् कुमार् डिमरी | 44 |
| 29 | विद्याददातिविनयम् | शेषकलेट् | 45 |
| 30 | आदर्शशिक्षकः | सागरिका पट्टनायका | 47 |
| 31 | अभिप्रेरणा शिक्षा च (MOTIVATION & EDUCATION) | तोताराम: | 48 |
| 32 | वैदिकशिक्षायाः महत्वम् | जयश्री बारिक | 51 |
| 33 | शिक्षाक्षेत्रे वर्तमानावश्यकता | यज्ञदत्त स्वाई | 52 |
| 34 | वैदिकशिक्षा | रेखाराणी पात्र | 53 |
| 35 | शिक्षकप्रशिक्षणम् | खुसिराम कटा | 54 |
| 36 | भारतस्य आत्मा संस्कृतम् | संजीब पधान | 55 |
| 37 | गुरुगौरवम् | भुवनेश्वर दास् | 56 |
| 38 | स्वाध्यायः | प्रशान्त: | 58 |
| 39 | नैतिकशिक्षा | गणपतिभट्ट: | 59 |
| 40 | बुद्धेः स्वरूपम् | रूपेशमोहान्त | 60 |
| 41 | धर्मेण हीनाः पशुभिः समानाः | रमेश बी.सि | 63 |
| 42 | शाकुन्तलस्य श्लोकचतुष्टये जीवनशिक्षणम् | बालचन्द्रभट्टः | 64 |
| 43 | वैदिककालीनशिक्षणविधयः | प्रदीपकुमार साहू | 66 |
| 44 | छात्राणामध्ययनं तपः | मधुस्मिता त्रिपाठी | 67 |
| 44 | अनेकान्तवादः | विनोदकुमार जैन: | 68 |
| 45 | गुरुः | शैलजा नन्दिनी जेना | 69 |

| | | | |
|---|---|---|---|
| 46 | शिक्षायाः व्यावसायीकरणम् ( Vocationalization of Education) | प्रज्ञानराणी साहु | 70 |
| 47 | पाठयोजनायाःआवश्यकतत्वानि | सन्तोषकुमार् साहु | 73 |
| 48 | वेदाङ्गेषुशिक्षा | भूपेन्द्रः | 74 |
| 49 | मूल्यशिक्षा | निरञ्जन बिस्वालः | 75 |


## हिन्दीधारा


| | | | |
|---|---|---|---|
| 50 | एक विचार | पिंकु साहु | 77 |
| 51 | बच्चेकामपरजारहेहैं | श्रद्धाञ्जलीस्वाइँ | 78 |
| 52 | वैष्णवजनतोतेनेकहीये | अर्चनासामन्तराय | 79 |
| 53 | संस्कृतऔरसंस्कृति | नवदीपशर्मा | 79 |
| 54 | सर्वशिक्षाअभियान | अनिमेषदेबशर्मा | 80 |
| 55 | अपना शिक्षाशास्त्रविभाग | नीरजपंतः | 81 |
| 56 | स्वामीविवेकानन्दजीकीशिक्षा | सुरजमहापात्र | 83 |
| 57 | शिक्षितहोनाबाकीहै | ममतापधान | 85 |
| 58 | शिक्षा | दिव्याकिंडो | 86 |
| 59 | शिक्षाकामहत्व | जयदेवबारिक | 86 |
| 60 | मूल्यों-संस्कारोंसेकटतीशिक्षा | प्रकाशलाक्रा | 87 |
| 61 | बहुतजरूरीहोतीशिक्षा | गीताञ्जलीबोई | 89 |
| 62 | मानवाधिकार और सामाजिक न्याय | पुष्पलता तन्ति | 89 |
| 63 | विराम चिन्हों का प्रयोग | तुषार रञ्जन चौहान | 91 |
| 64 | ओढ के तिरंगा क्यों पापा आये हैं | अजित सिंहः | 92 |
| 65 | मानवाधिकारऔरभारतीयपरंपरा | कविता जि. भट्टः | 93 |
| 66 | प्राचीनकालमेंमानवाधिकारकीअवधारणा | मेघश्री एन् | 94 |
| 67 | माँ की ममता | गुणराम साहु | 97 |

## English Dhara


| | | | |
|---|---|---|---|
| 68 | Piaget's views on concept formation | Dr. Ramachandrula Balaji | 99 |
| 69 | PURPOSE OF EDUCATION | *Subhasmita Sahoo* | 104 |
| 70 | DUTY IS GOD | Shushree Sangita Das | 105 |
| 71 | COMMUNICATION | ARJUN PADHAN | 107 |
| 72 | TEACHER | Shripati Bhat | 108 |
| 73 | Human Eye | Agneya Bhat | 115 |
| 74 | Students Life | Raghavendra Danageri | 117 |
| 75 | DIFFERENT MEANINGS OF EDUCATION | Saameer Ranjan Pradhan | 119 |
| 76 | Rastriya sanskrit sansthan | | |
| | Rajiv Gandhi campus- in my eyes | Malabika Nath | 120 |
| 77 | SARVEPALLI DR. RADHAKRISHNAN | Venkatesh G | 123 |
| 78 | 7 tricks to improve your teaching skills | ***Siddharth Naithani*** | 124 |


## कन्नडधारा


| | | | |
|---|---|---|---|
| 79 | ಅಪೂರ್ವಸಂಪತ್ತು | ಆದರ್ಶಕೆ.ಎಸ್. | 128 |
| 80 | ಶಿಕ್ಷಣ | ವಿನಯ್ಕುಮಾರ್ಭಾಗ್ವತ್ | 129 |
| 81 | ಶಿಕ್ಷಣಅಂದುಇಂದು- | ಗಣೇಶಅನಂತಭಟ್ | 130 |
| 82 | ಕನ್ನಡದಮೇಲೆಸಂಸ್ಕೃತದಪ್ರಭಾವ | ನಾಗರಾಜಜೋಶಿ | 132 |
| 83 | ಸಂಸ್ಕೃತದಹಿರಿಮೆ | ಹನುಮನಂತರಾಯಕೆ.ಡಿ. | 133 |
| 84 | | ಮನಸ್ಸೆಂಬುದುಮಾಹಿತಿಗಳಕಣಜವಲ್ಲ, | |
| ಅದೊಂದುಜಾಗೃತಗೊಳಿಸುವಶಕ್ತಿ. | | ಸುದರ್ಶನಭಟ್ಟ | 135 |
| 85 | ಯಾವುದುಜೀವಿಸಬೇಕಾದಜೀವನ ? | ರಾಮಕೃಷ್ಣಗಾಂವ್ಕರ್ | 138 |
| 86 | ಶಿಕ್ಷಣದಲ್ಲಿಯೋಗದಅವಶ್ಯಕತೆ | ಅಕ್ಷಯಭಟ್ಟ | 139 |
| 87 | ಸಂಸ್ಕೃತವುಪುರೋಹಿತಶಾಹಿಯಭಾಷೆಯೇ? | ರಘುವೀರಶೆಟ್ಟಿ | 141 |

# संस्कृतधारा

# वेदेषु पर्यावरणविज्ञानम्

डा.चन्द्रकान्तः
विभागाध्यक्षः, शिक्षाविभागः

पर्यावरणाशब्दस्य अर्थः भवति यत् परितः आवरणम् इति । अस्माकं परितः विद्यमानं वातावरणमेव पर्यावरणमित्युच्यते ।यच्चवातावरणं अस्मान् रक्षति, पोषयति वर्धयति, उज्जीवति तत् वातावरणं शुद्धम्,आरोग्यदायकं,शान्तं चिन्तनशक्तेः वर्धकं भवेत् ।एतन्मनसि निधाय वैज्ञानिकाः साम्प्रतं पर्यावरणस्य संरक्षणार्थं चिन्तनमध्ययन मारभन्त । अतः पर्यावरणस्य वैज्ञानिकमध्ययनमेव पर्यावरणविज्ञानमजायत । Environmental seience is a seientific study of our Environmental . to sustain it healthy. वस्तुतः पर्यावरणे वायुमंडलं, भूमण्डलं,जलमण्डलं, तथा भौतिकं रासायनिक ञ्च तत्वं समायांति । एतानि तत्वानि यथा प्रदूषितानि भवन्ति तदा मानवजीवनमेव बाधितं जायते ।प्राधन्येन पञ्चविधप्रदूषानि प्रसिध्दानि वर्तन्ते । तानि च १.वायुप्रदूषणं, २.जलप्रदूषणं, ३.भूखण्डप्रदूषणं , ४.ध्वनिप्रदूषणं , ५.परमाणुविकिरणप्रदूषणमिति । एतेभ्यः प्रदूषणेभ्यः पर्यावरणस्य संरक्षणंकर्तव्यमस्ति ।पर्यावरणस्य संघटकं तत्वं किम्, तेषु रक्षकतत्वं किम्, पर्यावरणशिद्धिः कथं जायते, पर्यावरण संरक्षणाविजयः के अथर्ववेधे पर्यावरणस्य संघटकं तत्वत्रयं वर्णितं वर्तते ।यथा त्रीणि छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम् ।

आपोवाता ओषधयः

तान्येक्स्मिन् भवन् आर्पितानि । अ.वे.१८.१.१७

जलवाय्वोष्दयः पर्यावरणस्य घतकत्रीणि तत्वानि भवन्ति ।यथा जलवायोः विना जीवनमसम्भवं वर्तते इत्यर्थः । वायोः संरक्षणेन एव अन्यानि तत्वानि संरक्षितानि। अतः युवं वायो सविता च भुवनानि रक्षथ इत्यनेन वाक्येन वायुसूर्ययोः महत्वं प्राप्यपादि ।

आवात् वाहि भोषजं वि वातवाहि यद् रूपः त्वं हि विश्वभेषज देवानां दूत ईयसे ।

ऋग्वेदेऽपि-

यददो वत ते गृहे अमृतस्य निधिर्हित तेन नो देहि जीवसे –ऋ.वे. १०.१८६.३ अनेन मन्त्रेणोच्यते यत् वायौ अमृतमस्ति अर्थात् (oxygen) प्राणवायुः अस्ति इति ।तन्नष्टं न भवेत् । अथः तादृशं कार्यं न कर्तव्यं येन oxygen नष्टं भवति ।

अथर्ववेदे – येपर्वाताः सोमस्पृष्टाः आपः । वातह् ! पर्जन्यः आदग्निस्ते क्रव्यादमशीशमः पर्वतजलवायुवर्षाग्नयः प्रदूषणं नाशयित्वा पर्यावशोधयन्ति इत्युच्यते ।ऊजनावरणां प्रूथिवीं रक्षति इति ऋग्वेदे अथर्ववेदे च प्रोज्यते यथा –

महत् तदुल्बं स्तविरं तदासीत् येनाविष्टितः प्रविवेशिथापः –ऋ.१०.५१.

तस्योत जायमानस्य – उल्ब आसिद् हिरव्ययः –अ.४.२.

महत् उल्ब शब्दः ओजोनावरणापरः । तस्य वर्णाः हिरण्मयः इति ज्ञायते ।

भूमेः विषयेऽपि – माता भूमिः पुत्रोऽहं पृथिव्याः –अ. १२.१.१२.

भूमिर्माता, भ्रातान्तरिक्षम्, द्यौर्नः पिता –अ.६.१२०.२.

पृथिवी माता, द्यौष्पिता – यजु.२.१०.११

द्यावा पृथिवी ... पिता माता – ऋ ५.४३.२.

दिवः पृथिव्याः पर्योजौद्भृतम् । वनस्पतिभ्यः पर्याभृतं सहः अपां ओज्मानम् –यजु- २९.५३

अस्मिन् मन्त्रे द्युलोकपृथिवीभ्यां ऊर्जा मिलति , वनस्पतयःशक्तीं यच्छन्ति ।जलं बलं (वीर्यं ) यच्छति इत्युच्यते ।

अतः

<u>द्यां मा लेखीः अन्तरिक्षं मा हिंसीः,</u>

पृथिव्या सम्भव –यजु -५.४३

अन्तरिक्षं दृहं अन्तरिक्षं मा हिंसीः -१४.१२

दिवं दृहं दिवं मा हिंसीः -१५.६४

उद् दिवं स्तभान अन्तरिक्षं पृण-५.२७

दिवं जित्व, अन्तरिक्षं जित्व १५.६

पृथिवीं दृहं पृथिवीं मा हिंसीः-१३.१८

अन्तरिक्षद्युलोकपृथिवीः प्रदूषणमुक्ताः सम्पादय इति जागरयति अयं मन्त्रः ।अथर्ववेदे प्रच्यते यत् यस्मिन् भावो प्रथिव्याः रवननं क्रियते तद्भागं पुनः पूरयतु इति यथा यत्ते भूमे विश्वनामि क्षिप्र तदपि रोहतु मा ते मर्म विमृश्वरि, मा ते हृदयमर्पिपम् –अ.१२.१.३५ अर्थात् रत्नं ,ग्यास,पेत्रोलाधिकं रवन्यते चेत् तत्र किमपि संस्थाप्य पूरयेदित्यर्थः अत्यथा भूकम्पादिकं।

जलसंरक्षणविषये – अप्स्वन्तरमृतम् अप्सु भेषजम् –ऋ.

आपः पृणीत भेषजम् – ऋ.१.२३.२१

आपोविश्वस्य भेषजीः तास्त्वा

मुञ्चन्तु क्षेत्रियात् – अ.३.७.५.

<u>आपश्च मे विरुधश्च मे –यजु.१८.१४</u>

वातो गन्धर्वः तस्यापो अप्सरस ऊर्जो नाम - यजु- १८.१४

सुमित्रियान आप ओषधयह् सन्तु –यजु.३६.२३.

वायुः गन्धर्वः जलं अप्सरा भवति ।जलं ऊर्जाय सोतः वर्तते ।जलं वनस्पतिश्च अस्माकं मित्राणि वर्तन्ते ।

<u>माऽपो हिंसीः – मा ऊशःअधीर्हिंसीः –यजु ६.२२</u>

अपः पिन्व ओषधिर्जीन्व –यजु-१४.८.

वान्स्पतिभ्यः जलं सिञ्चयित्वा सुरक्षिताः कर्तव्याः ।मूत्रं वाऽथ पूरिषं वा गंगातीरे करोति यः न दृष्टा निष्कृतिस्तस्य कल्पकोटिशतैरपि उच्छिष्टं काफकं चैव गंगागर्भे च यस्त्यजेत् सयाति नरकं घोरं ब्रह्महव्यां च विन्दंति ।( पद्म पुराणक्रियायोग ८.८.१०.)

यज्ञः प्रदूषणस्य सर्वित्तमं समाधानं वर्तते इति दर्शयति यत् पुरुषेण हविषा देवा यज्ञमतन्वत ,वसन्तोऽस्यासिदाज्यं ग्रीष्म इध्म शरद्दविः ऋ.१०.९०

ऋतुचक्रं, वर्षचक्रं ,अहिरात्रचक्रं , सौरचक्रं, चन्द्रचक्रं सर्वं सन्तुलितं जायते । तस्मात् अयं यज्ञो भुवनस्य नाभिः -यजु-२३.६.

यज्ञःसृष्टि चक्रस्य केन्द्रं (नाभिः) वर्तते । भूमिं पर्जन्य । जिन्वन्ति दिवं जिन्वन्त्यग्नयःकृषिश्चमे वृष्टिश्च मे—यज्ञेन कल्पन्ताम् –यजु १८. १

अग्निःप्रदूषणस्य निवारणं दहनशक्त्या करोति । ध्वनिप्रदूषणं शब्दशक्त्या निवारयितुं शक्यते ।

यावत् ब्रह्म विष्टितं तावति वाक्

यावत् धावापृथिवी तावदेव तत् –ऋ- १०.११४.८

वाग् हि वृजः –ऐत्.ब्रा.४.।

वाग् उ सर्वं भेषजम्- शत. ब्रा.७.२.४.२८

वाग् हि शस्त्रम् –ऐ.ब्रा.३.४४.

<u>यथैव ससृजे घोरं तथैव शारितरस्तु नः –अ.१९.९.३.</u>

आह्मेव वात इव प्रवामि

आरभमाणा भूवनाति विश्वा –ऋ-१०.१२५.८

<u>वाग् वै मनसो हसीयसी –शत ब्रा.१.४.४.७.</u>

शब्दशक्तेः सूक्ष्मरूपं विद्युत् तरङ्गः (Electro Magnetic Waves ) मनसः अपेक्षया सूक्ष्मतरं भवति ।

*****

# शास्त्रशिक्षणार्थं सङ्गणकसहकृतशिक्षणप्रतिमानानि

डा. हरिप्रसादः के
वरिष्ठव्याख्याता, शिक्षाविभागः

शास्त्रशिक्षणार्थं सङ्गणकसहकृतशिक्षणप्रतिमानानि साम्प्रतं शास्त्रशिक्षणक्षेत्रे अत्यन्तं औत्सुक्येन उपयुज्यमानानि वर्तन्ते । एतानि वस्तुतः आधुनिककाले परिवर्तितशैक्षिकोद्देश्यानुसारम् अत्यन्म् उपयुक्तानि भवन्ति । तेषां स्वरूपं स्थूलरूपेण वयमत्र विवेचयामः ।

1. **संरचिताः** (Audio) **श्रव्यपाठाः**

भारते बहुषु विश्वविद्यालयेषु असर्वकारीयसंस्थासु च परियोजनादिमाध्यमेन प्रगल्भानां विदुषां शास्त्रशिक्षणादीनां ध्वनिमुद्रणं कृतमस्ति । तत्तच्छास्त्रे विद्यमानानां प्रकरणग्रन्थानां वा प्राधानबोध्यविषयाणां वा ध्वनिमुद्रणं संरचितक्रमेण कृतमस्ति । एतेषां सङ्गणकमाध्यमेन अपेक्षानुसारं उपयोगः कर्तुं शक्यः । अत्र तस्य तस्य विदुषः सम्प्रेषणसामर्थ्यानुसारं प्रागल्भ्यानुसारञ्च पाठनस्य गुणवत्ता निश्चिता भवति । मुद्रितपाठाः अत्र भवन्ति इत्यतः छात्रः अत्र अध्यापकेन सह संवहनं/अन्तःक्रियां कर्तुं अवसरं न प्राप्नोति । तथापि पूर्वपक्षसिद्धान्तसरणिमाश्रित्य (अधिकरणशरीरक्रमेण वा पञ्चावयवानुमानक्रमेण वा) छात्रस्य मनसि उत्पत्स्यमानानां प्रागेव ऊहां कृत्वा आक्षेपं वा सन्देहं वा कृत्वा समाधानदानस्य व्यवस्था आश्रीयते इत्यतः छात्रस्य विषयगताः सन्देहाः न भवन्त्येव । भाषायां छात्रस्य अधिकारः नास्ति चेत्, विदुषः सम्प्रेषणक्रिया जटिला अस्ति चेत् कदाचित् छात्रः क्लेषम् अनुभवेत् । तदभावे शास्त्रशिक्षणपरम्परा छात्रस्य समीचीनबोधनयोग्या एव वर्तते इत्यत्र नास्ति संशीतिलेशः ।

2. संरचिताः Video पाठाः

यथा संरचिताः श्रव्यपाठाः सज्जीकृताः तथैव आधुनिकविकसितयन्त्राणाम् आविर्भावकारणात् प्रतिथयशसः तत्तद्विदुषः निर्दिष्टविषयेषु कृतस्य व्याख्यानस्य दृश्यमुद्रणं कृत्वा सान्द्रमुद्रिकासु संरक्षणं कृतमस्ति विविधाभिः संस्थाभिः । काश्चन संस्थाः एतान् पाठान् अन्तर्जालेऽपि आरोपितवत्यः । तस्मात् कारणात् विविदिषवः माणवकाः विद्वांसश्च यदा कदापि आवश्यकता भवति चेत् अनायासेन जालपुटात् तान् पाठान् निःशुल्कं स्वीकर्तुं प्रभवन्ति । कक्ष्याशिक्षणेऽपि अध्यापकाः एतादृशपाठानां यथायोग्यम् उपयोगं कर्तुमर्हन्ति । अत्र पाठेषु कैश्चित् विद्वद्भिः श्यामपट्टस्य आवश्यकतानुसारम् उपयोगः कृतः । कैश्चित् चित्रनिर्मातृभिरेव आवश्यकतानुसारं फलकानि/स्फोरकपत्राणि निर्मितानि । तेषु पलकेषु कोष्टकानि, रेखाचित्राणि, अन्यानि च आवश्यकानि चित्राणि सुनिबद्धानि भवन्ति । उदाहरणार्थं - संस्कृतभारत्या महाबलेश्वरभट्टदेवनाथाचार्यदेवदत्तपाटीलप्रभृतीनां व्याकरणादिपाठनस्य वीडियोचित्रीकरणं कृत्वा सान्द्रमुद्रिकासु

संरक्षितमस्ति । राष्ट्रियसंस्कृतसंस्थानप्रभृतिभिः बहुभिः संस्कृतविश्वविद्यालयैः ईदृशानि कार्याणि साधितानि । एताः शास्त्रशिक्षणसामग्रीः सङ्गणकमाध्यमेन उपयुज्य शैक्षकलाभान् बहवः प्राप्नुवन्तः सन्ति ।

3. कक्ष्याशिक्षणस्य मुद्रिताः पाठाः(यथा MOOCs)

साम्प्रतिके आधुनिकयुगे सङ्गणकानि क्रय्यानि वर्तन्ते । अतः अधिकाधिकाः संस्कृतप्राध्यापका अपि एतस्य शैक्षिकोपयोगं कुर्वाणाः सन्ति । सङ्गणकेषु चित्रग्राहकयन्त्राणि भवन्ति इत्यतः कक्ष्यायाम् अध्यापनसमये एव अध्यापनस्य चित्रमुद्रणं कृत्वा जालपुटे स्थापयन्ति केचन । तदर्थं साम्प्रतं केचन तन्त्रांशाः उपलभ्यन्ते । एतादृशतन्त्रांशानां माध्यमेन कक्ष्याशिक्षणस्य स्वीये सङ्गणके एव मुद्रणं विधाय U Tube मध्ये आरोपणं क्रियते । यान् पाठान् जगति कस्मिन्नपि कोणे विद्यमानः अध्ययनेच्छुकः प्राप्तुम् अर्हति । यथा MOOCs इत्यस्यां योजनायां कक्ष्याशिक्षणस्य साक्षात् प्रसारार्थं अन्तर्जालस्य तदनुकूलतन्त्रांशानां च उपयोगः क्रियते तथैव संस्कृतशिक्षाक्षेत्रेऽपि शास्त्रशिक्षणस्य प्रयोजनं वर्धयितुं सङ्गणकसहकृताधिगमः साहाय्यं विधत्ते । स्कैप्-सदृशतन्त्रांशानां माध्यमेन अध्यापनसमकालमेव सर्वेऽपि सुदूरे सन्तोऽपि पिपठिषवः पाठान् द्रष्टुं श्रोतुं प्रतिक्रियां कृत्वा प्रश्नानां समाधानानि च प्राप्तुं शक्नुवन्ति ।

4. Animated पाठाः

सङ्गणके आधुनिककाले बालानां बोधाय मोदाय च कथानां दृश्यरूपकं निर्मीयते । दृश्यरूपकेषु पात्राणां निर्वहणं आरम्भिककाले मनुष्यैः क्रियते स्म । जन्तूनां पात्राणि भवन्ति चेत् जन्तुसदृशं वेशभूषादिकं धृत्वा तत्सदृशध्वनिम् उत्पाद्य रूपकस्य प्रभावं वर्धयन्ति स्म । विकसितानां तन्त्रांशानां उद्भवेन कालक्रमेण स्थिरचित्राणि निर्माय तेषां विभिन्नायामेषु कथानुगुणं तत्तत्प्राणिनाम् अवयवानां चलनं उत्पादितम् । क्रमशः पात्राणां मुखे प्रसङ्गनुसारं भावनाः अपि उत्पादयितुं सङ्गणकज्ञाः शक्ता अभवन् । अस्य तन्त्रांशस्य आदौ मनोरञ्जनार्थं उपयोगः क्रियते स्म । गच्छति काले शैक्षिकोपयोगार्थमपि अस्य उपयोगः आरब्धः । भाषाशिक्षणे एतस्य सुमहान् उपयोगः वर्तते । शास्त्रशिक्षणे यद्यपि एतस्य उपयोगः नास्तीव वर्तते तथापि संस्कृतभाषाशिक्षणे महदुपयोगो वर्तते इत्यतः आचार्यमुरलीधरशर्मप्रभृतिभिः सज्जीकृताः "शिक्षिका" इत्यादिसामग्र्यः संस्कृतप्रपञ्चे भाषाध्येतॄणां बुद्धिविकासाय मनोविनोदाय च सन्तीति निश्चप्रचम् ।

5. PPT माध्यमेन सज्जीकृताः पाठाः

साम्प्रतिके काले संस्कृतक्षेत्रे अध्यापनरताः अधिकाधिकाः प्राध्यापकाः सङ्गणकविद्यायाः प्राथमिकपरिचयं प्राप्य अनुदेशनोपयोगीनि शिक्षणोपकरणानि स्वयं निर्मातुं सक्षमाः सन्ति । कक्ष्यायां तान्युपकरणानि उपयुञ्जानाश्च सन्ति । विशिष्य दृश्यश्रव्यमाध्यमानां उपयोगेन वर्णविन्यासे विषयविन्यासे च अधिकं प्रभावं वर्धयितुं अपेक्षितचिन्तनं विधाय PPT पाठान् सज्जीकुर्वन्ति । एतादृशाः PPT माध्यमेन सज्जीकृतपाठाः

संस्कृतेतरक्षेत्रे अन्तर्जाले भूरिशः उपलभ्यन्ते । तादृशपाठानां अन्तर्जाले विक्रेत्र्यः संस्थाः अपि बह्व्यः विलसन्ति । धनं प्रदाय तेषां उपयोगः कक्ष्यायां कर्तुं शक्यते । संस्कृतक्षेत्रेऽपि अल्पीयस्या संख्यया यद्यपि अन्तर्जाले ईदृशाः पाठाः ये लभ्यन्ते ते तावत् केवलं भाषाशिक्षणसम्बद्धाः, न तु संस्कृतमाध्यमेन शास्त्रशिक्षणोपयोगिनः इति मन्तव्यम् । संस्कृतक्षेत्रे विद्यमानाः शास्त्रशिक्षकाः यदि स्वस्वक्ष्यायां बोधनार्थं सज्जीकृतान् पाठान् अन्तर्जाले आरोपयेरन् तर्हि महतः शास्त्रशिक्षकछात्रसमूहस्य उपयोगाय ते पाठाः सम्पद्येरन् इति निश्चप्रचं वक्तुं शक्यते ।

इत्थं संस्कृतक्षेत्रे सङ्गणाकमाश्रित्य शिक्षकाः कथं वा स्वाध्यापनकर्मणि अध्यापनप्रभावं वर्धयितुं **सङ्गणकसहकृतशिक्षणप्रतिमानानि**, **शास्त्रशिक्षणार्थं सङ्गणकसहकृतशिक्षणप्रतिमानानि च** उपयुञ्जीरन् इत्येदर्थं विषयोऽयं न्यरूपि । यद्यपि प्राचीनभारतीयशिक्षणविधयः छात्रस्य विकासकर्मणि अतुलितं योगदानं कर्तुं सम्प्रत्यपि शक्नुवन्ति, अपि च असादितं ज्ञानं चिरं छात्रमस्तिष्के मुद्रापयितुं शक्नुवन्ति तथापि परिवर्तिते संसारे सर्वोऽपि इच्छानिच्छादिकं अपरिगणय्य अध्यापनीय इत्यतः पूर्वोक्तसङ्गणकसहकृतशिक्षणप्रतिमानानि आश्रयणीयानि इति पार्थक्येन वक्तव्यं नास्ति ।

## अधिगमस्य प्रकाराः

डा.गणेश ति. पण्डितः
सहायकप्राध्यापकः, शिक्षाविभागः
राष्ट्रियसंस्कृतसंस्थानम् ( मानितविश्वविद्यालयः )
राजीवगान्धीपरिसरः, मेणसे, श्रृङ्गेरी – 577139

प्रत्येकमपि विद्यालयः शिक्षणाधिगमप्रक्रियायाः प्रधानं केन्द्रमिव कार्यं कुरुते इत्यत्र नास्ति सन्देहः । एवमेव प्रत्येकमपि शिक्षकः बालानाम् अधिगममेव लक्षीकृत्य अनुदिनम् अध्यापयति इत्यपि सुस्पष्टमेव । परन्तु अधिगमः एकविधः नास्ति । तस्य प्रकाराः सन्ति अनल्पाः । ते के इति अत्र विचार्यते ।

1. संवेदनाश्रितगत्यधिगमः ( Sensory motor Learning )

एतादृशे अधिगमे बालः विविधानि कौशलानि अधिगच्छति । द्विचक्रिकाचालनम्, उट्टङ्कणम्, चित्ररचना इत्यादीनि कौशलानि अत्र उदाहरणानि सन्ति । क्रियापराः बालचेष्टाः विशिष्य अत्र उदाहरणानि भवितुम् अर्हन्ति । अनुकरणेन अपि बालाः यदपि अधिगच्छन्ति तत्सर्वमपि अस्मिन्नेव वर्गे अन्तर्भवतीति ।

2. बौद्धिकाधिगमः ( Intellectual Learning)

बालस्य क्रमिकविकासः तस्य मानसिकविकासमपि द्योतयति । मानसिकविकासः बाले तार्किकचिन्तनक्षमताम् अभिवर्धयति । अयमेव बौद्धिकाधिगमस्य परिचायकोऽस्ति ।

3. गत्यात्मकाधिगमः (Motor Learning)

लघुबाले मानसिकशक्तिः अथवा क्षमता न्यूना भवति । शारीरिकशक्तेः बलेनैव सः बहु किञ्चित् अधिगच्छति । बालस्य गतिशीलता एव गत्यात्मकाधिगमस्य मूलं वर्तते ।

4. प्रतिबोधात्मकाधिगमः (Perceptual Learning)

ज्ञानेन्द्रियाणि ज्ञानस्य द्वाराणि सन्ति । मस्तिष्कस्य विकासे जाते सति ज्ञानेन्द्रियाणि अपि स्वतः एव क्रियाशीलानि भवन्ति । ज्ञानेन्द्रियाणां माध्यमेन मस्तिष्कं प्रति विभागाणां सम्प्रेषणं प्रतिबोधो वा जायते । अयमेव प्रतिबोधात्मकाधिगमः इत्युच्यते ।

5. सम्प्रत्ययात्मकाधिगमः (Conceptual Learning)

मानसिकशक्तेः सर्वतोमुखेन विकासः यदा भवति तदा बालः तर्ककल्पनचिन्तनतुलनाद्याः क्षमताः बिभर्ति । सर्वस्यापि पदार्थस्य सम्प्रत्यः तस्मै स्पष्टः भविष्यति । अयमेव सम्प्रत्ययात्मकाधिगमः इत्युच्यते ।

6. साहचर्यात्मकाधिगमः (Associate Learning)

"एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकम्" इत्येषः नयः अत्र सम्यगन्वेति । सम्प्रत्ययात्मकाधिगमोऽपि साहचर्यात्मकाधिगमस्य साहचर्येणैव अग्रे सरति । प्रत्येकमपि नवीनपदार्थः विभागे वा साहचर्यबलेनैव अधिगम्यते । परस्परं पूरकाणां विचाराणां सन्दर्भे अयमधिगमः प्रासङ्गिकतां भजते ।

7. शंसात्मकाधिगमः (Appreciational Learning)

यदा सम्प्रत्ययः स्पष्टः साहचर्यबलेन च पुनः यत्किमपि अधिगम्यते तदा ज्ञानं स्थायि भविष्यति । किञ्च प्राप्तस्य ज्ञानस्य विवेचनक्षमता शंसनक्षमता वा बाले स्वतः एव उदेति । एतादृशः अधिगमः एव शंसात्मकाधिगमः इत्युच्यते ।

8. अभिवृत्यात्मकाधिगमः (Attitudinal Learning)

"यथा दृष्टिः तथा सृष्टिः" इत्युक्तिः प्रसिद्धा एव । बालोऽपि प्रत्येकमपि पदार्थं स्वीयाभिवृत्तिमाश्रित्यैव अधिगच्छति । तस्य मानसिकदशा अपि अधिगमे प्रभावं जनयति । सः यथा चिन्तयति तथैव अधिगृह्णाति । एवम् अत्र व्यक्तिगताभिप्रायाणां प्रभावः स्वतः एव जायते । उदाहरणार्थम् – गणितीयसमस्याम् एकेनैव दृष्टान्तेन चैत्रः अधिगच्छति चेत् मैत्रः दृष्टान्तान्तरेणैव तद्विज्ञातुमर्हति । उभयोः अभिवृत्तिभेदः एव अत्र निदानम् । एवम् अधिगमस्य बहवो हि प्रकाराः कल्पयितुं शक्यन्ते ।

******

# शिक्षायाः दर्शनक्षेत्रे प्रभावः

**डा.नारायण वैद्यः**
अतिथिप्राध्यापकः,शिक्षाविभागः
राष्ट्रियसंस्कृतसंस्थानम् ( मानितविश्वविद्यालयः )
राजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी – 577139

शिक्षा मानवविकासस्य गृहं विद्यते । येन व्यक्तेः सर्वाङ्गीणविकासं कृत्वा उत्तमव्यक्तित्त्वस्य निर्माणं कृत्वा भव्यं भवनं निर्मातुं शक्यते । श्रेष्ठव्यक्तेः व्यक्तित्वं स्वकीयं जीवनदर्शनं भवति । येषां दर्शनस्य विकासाय योगदानं वर्तते ते सर्वे शिक्षाशास्त्रिणः महान् दार्शनिकाः वर्तन्ते इति वक्तुं शक्यते। अतः अत्र शिक्षायाः दर्शनक्षेत्रे प्रभावः विव्रीयते ।

शिक्षा दर्शनस्य प्रारम्भिकरूपं विद्यते

शिक्षा माध्यमः अस्ति तथा दर्शनं गन्तव्यं स्थानं विद्यते । शिक्षादर्शनयोः सम्बन्धः अनेन प्रकाश्यते यत् कोऽपि व्यक्तिः शिक्षायाः गम्भीरं चिन्तनं करोति सः कथंचित् निष्कर्षं प्राप्नोति । अनवरतं चिन्तनेन सैद्धान्तिकरूपम् अवगच्छति । तदनु शिक्षादार्शनिकः भवति । शिक्षा क्षेत्रे उत्पद्यमानसमस्याः यदि नावलोक्यन्ते तर्हि शिक्षा क्षेत्रे अस्थिरता उत्पद्यते । अनेन प्रगतिः अवरुद्धः भवति । दर्शनं शिक्षां गतिशीलं करोति । येन शिक्षायाः उन्नतिः जायते ।

शिक्षा दार्शनिकविचाराणां व्यावहारिकरूपं वर्तते

मानवः सामाजिकः प्राणी अस्ति । सः विभिन्नप्रकारकक्रियाम् आचरति। तस्मै प्रतिदिनं समस्याभिः सह संघर्षः करणीयः भवति। समस्यासमाधानाय सः मार्गमन्विषति तथा अस्य जगतः सृष्टिविषये चिन्तनं करोति। अनवरतं चिन्तनेन समस्यासमाधनोपायः ज्ञायते । लब्धोपायस्य व्यावहारिकरूपज्ञानं वर्धयति ।

शिक्षा दर्शनस्य गतिशीलः पक्षः अस्ति

दर्शनस्य कार्यं शिक्षा सम्बन्धि तथ्यानां प्रमाणीकरणं विद्यते । दर्शनम् एतादृशसिद्धान्तानां प्रतिपादनं करोति, येन शिक्षा द्वारा व्यावहारिकज्ञानं दीयते । एवं प्रकारेण शिक्षा तथा दर्शनं द्वयमपि एकस्य नाणकस्य मुखद्वयं विद्यते । एकस्य अभावे अपरस्य अस्तित्वं नास्ति । दर्शनं विचारात्मकपक्षः चेत् शिक्षा क्रियात्मकपक्षः अस्ति । अनेन स्पष्टं जातं दर्शनं विना शिक्षा वास्तविकं गन्तव्यस्थानं न प्राप्नोति । यदा दर्शनस्य समुचितसाहाय्यं लभ्यते चेत् शिक्षा प्रक्रिया समुचितदिशि अग्रेसरति । एवं प्रकारेण दर्शनं जीवनस्य आदर्शप्राप्त्यर्थं सहायकः अस्ति तथा व्यावहारिक साधनमपि वर्तते । शिक्षा तथा दर्शनं एकम् अपरं आश्रितं वर्तते । अतः द्वयोर्मध्ये

घनिष्ठः सम्बन्धः अस्ति । तथा चोक्तं एडम्स महोदयेन ''शिक्षा दर्शनस्य गत्यात्मकः पक्षः वर्तते । अयं दार्शनिकविश्वासस्य क्रियाशीलरूपं विद्यते, जीवनस्य आदर्शानां प्राप्त्यै व्यावहारिकसाधनम् अस्ति'' इति ।

दर्शनं विकल्पस्य मौलिकसिद्धान्तः वर्तते

कस्यापि व्यक्तेः निष्ठायाः सम्पूर्णता तस्य जीवनदर्शनं भवति । जीवनदर्शनं व्यक्तेः सांसारिकविचारधारा अस्ति । अयम् एकः विधिः वर्तते । यस्यान्तर्गतं व्यक्तिः वस्तूनां, घटनानां, सम्बन्धानां च मूल्यनिर्धारणं करोति । उदाहरणार्थं - कोऽपि व्यक्तिः भौतिकलाभार्थं प्राथम्यं ददाति तथा अन्यस्य सहभागितायाः किंचिन्महत्वं ददाति । इदं मूल्यनिर्धारणं तस्य जीवनदर्शनस्य घटकः वर्तते । किन्तु अन्यव्यक्तेः जीवनदर्शनं अनेन भिद्यते । सः इदं दर्शनम् अनुपयुक्ततिति चिन्तयति । एवं प्रकारेण जीवनदर्शनं पूर्णतया व्यक्तिगतं भवति ।

अनेन स्पष्टं यत् मानवजीवनस्य अत्यधिकशक्तिशाली भागः अथवा शक्तिः तस्य जीवनदर्शनं विद्यते । व्यक्तिः विभिन्नवस्तुभिः अनेककार्याणि साधयति तथा कार्यसम्पादनज्ञानं अत्यावश्यकं महत्वपूर्णं च वर्तते। कथं यानं चालनीयम् ? धनं कथं जीवनरक्षणार्थम् उपयोगः करणीयः इत्येतत्सर्वं शिक्षा द्वारा अवगम्यते । एवं प्रकारेण कस्यापि व्यक्तेः जीवनदर्शनं तस्य विकल्पस्य मौलिकसिद्धान्तः विद्यते ।

शिक्षायाः प्रत्येकं कार्यक्रमे मूल्यानां विकल्पः निहितः अस्ति

इदं शिक्षादर्शनस्य कार्यं वर्तते यत् तत् करणीयं क्रियायां किं सम्मिलितं विद्यते, यत् शिक्षाक्षेत्रे सार्वकालिकं शाश्वतम् अस्ति । निश्चितरूपे बौद्धिकविकल्पः एकः सततविकल्पः विद्यते । अत्र इदं निश्चितं सम्मिलितमस्ति यत् अन्यस्य अपेक्षया अमुकविकल्पः अधिकमूल्यवान् अस्ति । किन्तु एतदर्थं सत्यनिष्ठायाः भावः आवश्यकः । जान डीवी एवं जान एल. चाइल्डस् सन्दर्भेऽस्मिन् अवदताम् - ''सत्यनिष्ठा उद्देश्यानां एवं मूल्यानां कारणान्वेषणाय तथा अभिव्यक्त्यै समधिकं निष्पक्षतां वा×छति, तत् चितं तथा अस्वीकृतं वर्तते''।

**सन्दर्भग्रन्थसूची**

1. शिक्षा के दार्शनिक एवं सामाजिक आधार - डा. के.पी.पाण्डेय, विश्वविद्यालय प्रकाशन, वारणासी
2. शिक्षा दर्शन - डा. भास्करमिश्रः, नाग पब्लिशर्स,जवाहर नगर,दिल्ली
3. शिक्षा के सामान्य सिद्धान्त - त्यागी - पाठक, विनोद पुस्तक मन्दिर, आगरा - 2

******

## मानसिकरूपेण मन्दबालका:

Dr. P. Aravinda kumar somadutt
lecturer
R.G. Campus, sringeri.

मानसिकमन्द: इत्युक्ते मानसिकविकासस्य अन्तरे एका अवस्था, अस्यां अवस्थायां बौद्धिकविकास: न्यून: भवति। एतादृशबालकानां मन्दबुद्धि: बालका: इतिनाम्ना कथ्यन्ते। मन्दबुद्धिबालकानां बुद्धिलब्धि: साधारण बालकानां अपेक्षया अल्प: भवति। समाजे मन्दबुद्धय: त्रीणि प्रतिशतं भवन्ति। एते बालका: शिक्षायां ध्यानं न स्थापयन्ति। एतेषां बालकानां सामाजिक असंवेदनशील, जागरूक विषये विकास: अल्प: भवति। नूतन technic प्रयोगाभावेपि एतेषां शिक्षाया: गति: अवरोध: भवति। एतेषां व्यवहार: परिवारेषु, समाजे सम्यक् न भवति। अन्ये बालका: मन्दबुद्धिबालकै: सह वसन्ति चेत् मन्दबुद्धय: भविष्यन्ति।

मानसिकमन्दबालकानां बुद्धिलब्धि: सामान्यबालकानाम् अपेक्षया अल्प: इति तुलनायां ज्ञात:। स्किन्नर् महोदयेन मन्दबुद्धिबालकानां मन्दबुद्धि:, अल्पबुद्धि:, विकलाङ्गबुद्धि:, अभ्यसने अवरोधबुद्धि:, मूढ: इति नामानि स्थापित:।

### मानसिकमन्दताया: अर्थ:

ये बालका: मानसिकमन्दरूपेण भवन्ति तेबालका: एव मानसिकमन्दबुद्धिबालका: भवन्ति। एतेषां वय: अपेक्षया मानसिकयोग्यता न्यून: भवति। अभ्यसने अपि मन्दं चलति। विद्यालये समवयस्क बालकानां अपेक्षया पठने, लेखने विषयेषु मन्दतां प्रदर्शयन्ति। मानसिकमन्दता, मानसिकन्यूनता, मानसिक अपसामान्यता एवं मानसिकविकलाङ्गता इत्यादि नामानि मानसिकमान्दताया: पर्यायवाचकानि।

### मानसिकमन्दताया: परिभाषा

विभिन्न मनोवैज्ञानिका: मानसिकमन्दताया: विषये परिभाषां भिन्न भिन्नरूपेण उक्तवन्ता:।

PWD Act 1955 &National Trust Act 1995 S2 अनुसारेण मानसिकमन्द इत्युक्ते मानसिकमन्दस्य मानसिकविकास: अवरुद्ध: भवति। सामान्यरूपेन न भवति।

ट्रेड् गोल्ड् अनुसारेण मानसिकदुर्बल इत्युक्ते एका अपूर्णमानसिकविकासस्य स्थिति:। अत्र कारणं किं इत्युक्ते मानव: निरीक्षणे, नियन्त्रणे, बाह्यविषयानां सम्पर्के, स्वीय अस्तित्वदृष्टे:, स्वीय सहयोगीनां परिवेषानां अनुकूलकरणे सामर्थं न भवति।

बेण्डा अनुसारेण य: मानसिकदोष: भवति स: स्वीय क्रियाकलापानां व्यवस्थितकरणे असमर्थ: भवति। तस्य सर्वं अभ्यासेन बोधनीयम्। तथा स्वयं, स्वीयसमुदायकल्याणार्थं निरीक्षणं, नियन्त्रणं आवश्यकम्।

क्रो-क्रो अनुसारेण मानसिकमन्दबालकानां बुद्धिलब्धि: ७० त: न्यून: भवति। अत: तान् मन्दबुद्धिबालका: इति कथयन्ति।

मानसिकमन्दबालकानां बौद्धिकक्षमता अपि न्यूना भवति। अत: चिन्तनशक्ति:, अवगाहनशक्ति: अल्प: भवति। एतेषां बुद्धिलब्धि: ७० त: न्यून: भवति। तथा अनुकूल व्यवहारे विकास: स्वल्प: अत: दैनिक क्रियाकलापेषु अन्येषां उपरि आधारा: भवन्ति। एतेषां विशेषशिक्षणद्वारा प्रशिक्षता: भवन्ति। आत्मविश्वासं सम्पादयन्ति।

## वेदेषु पर्यावरणस्य विवेचनम्

प्रियतमा सेठी
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमांक-801

सर्वज्ञानमयो वेदः । सः विश्वस्य सम्पूर्णज्ञानभण्डारः अस्ति । वेदेन मनुष्याणां विचारविमर्शः सत्यासत्यस्य ज्ञानं च भवति । वेदेषु पर्यावरणस्य सम्बद्धाः अनेकमन्त्राः विद्यन्ते । पर्यावरणम् इत्यस्य शाब्दिकार्थः पर्यावृतिः पर्यावरणम् । यत् परितः आवृणोति आच्छादयति मानवजीवनं प्रभावयति तत् पर्यावरणशब्देन गृह्यते।

अस्मान् परितः यानि पञ्चमहाभूतानि सन्ति तेषां समवायः एव परिसरः। अतः प्राणिनां जीवनस्य पञ्चमहाभूतेभ्यः घनिष्ठसम्बन्धः वर्तते । अतः एतदर्थं वेदेषु शुद्धपर्यावरणस्य विशेषरूपेण स्थानं वर्णितं वर्तते ।

वैदिकयुगस्य मानवाः जीवनधारणाय प्रकृत्याः आश्रयं स्वीकृतवन्तः । प्रकृत्या सह खलु नानाविधप्रयोजनाय ते व्यवहारं कृतवन्तः । ऋग्वेदे, सामवेदे, यजुर्वेदे, अथर्ववेदे च ऋषयः परिवेशस्य गुरुत्वं स्वीकृतवन्तः। ऋग्वेदे आकाशः मर्त्यवासीनां जनकरूपेण स्वीक्रियते । न केवलं ऋग्वेदे अपि तु सामवेदेऽपि पर्यावरणस्य आधाररूपेण वायोः गुरुत्वम् उपलभ्यते । ऋग्वेदमनुसृत्य अथर्ववेदेऽपि द्युलोकेन सह पृथिव्याः स्मृतिः दृश्यते । तथापि अथर्ववेदे पृथिवी विशेषरूपेण गुरुत्वम् आवहति । इयं पृथिवी अन्नेन सह अस्माकं प्राणान् जीवनं आयुश्च धृतवती ।

पर्यावरणे वायुमण्डलस्य स्थलमण्डलस्य जलमण्डलस्य रासायनिकतत्त्वानाञ्च सङ्ग्रहो वर्तते । एवं पर्यावरणं भौतिकजैविकतत्त्वानां संकलनेन भवति । भौतिकतत्त्वेषु मृत्तिका, जलं, वायुः, आकाशः प्रकाशश्च

सन्ति । जैविकतत्त्वेषु सम्पूर्णजीवजगद्वृक्षवनस्पतयश्च सन्ति । आदौ भौतिकतत्त्वेषु पञ्चतत्त्वेषु पृथिवी अस्माकं कृते अतीव सुखकारिणी भवति । वेदे वर्णितम् अस्ति-

**" स्योना पृथिवी नो भवानृक्षशनिविनि। यच्छा नः शर्म स प्रथा"।।**

अस्मिन् मन्त्रे एवं प्रार्थनां कृतवन्तः, त्वं अस्माकं कृते सुखरूपा भव।

**पर्यावरणशिक्षायाः आवश्यकताः-** अध्यायस्याध्ययनेन एवं स्पष्टं भवति यत् प्राचीनकाले अस्माकं पर्यावरणं संरक्षितं सन्तुलितञ्चासीत्। यदि काचन पर्यावरणीयसमस्या आयाति स्म तर्हि समाधानं सर्वे ऋषयः अनौपचारिकरूपेण एवं कुर्वन्ति स्म । परं सम्प्रति जनसंख्यावृद्धया औद्योगिकीकरणेन अन्यकारणेन च अस्माकं पर्यावरणं पूर्णरूपेण प्रदूषितमस्ति। प्रकृत्यां एतत् सामर्थ्यं नास्ति, येन पर्यावरणं पुनः सन्तुलितं भविष्यति । सम्प्रति जीवनं जगति दुष्करं प्रतिभाति । सर्वकारेण ये उपायाः क्रियन्ते तेषां क्रियान्वयनं पूर्णरूपेण न भवितुमर्हति । यतः नागरिकाः पूर्णजागरुकाः न सन्ति । एतदर्थं पर्यावरणशिक्षा साम्प्रतिकयुगे अतिमहत्वपूर्णा अस्ति।

सौरमण्डले एकमात्रं ग्रहः पृथ्वी अस्ति यत्र जीवनं भवितुमर्हति वा । यदि इयं हि नष्टा भविष्यति जीवाय अनुपयुक्ता भविष्यति तर्हि जगति जीवनाभावः भविष्यति । अथर्ववेदे ऋग्वेदे बहूनि उदाहरणानि उदाह्रियन्ते यथा-

**माता भूमिः पुत्रोऽहं पृथिव्याः।**

**अरण्यानां पतये नमः।**

**मा औषधि हिंसीः।**

सर्वासां पर्यावरणीयसमस्यानां मूलं भवति जनसंख्यावृद्धिः। जनसंख्यावृद्धया एव प्रकृतौ असन्तुलं जातमस्ति । सम्प्रति जनसंख्यावृद्धिः इत्थं भवति येन अस्माकं श्रृङ्खलितं जनसंख्याप्रकृतिचक्रं विश्रृङ्खलितं जातम् । प्रकृतिचक्रस्य व्यवस्थापनाय भविष्यत्काले सुरक्षितं संरक्षितञ्च वातावरणं हस्तान्तरयितुं च जनसंख्यावृद्धयावरोधनमावश्यकम् ।

सम्प्रति जगति औद्योगिकक्रान्तिरागता वैज्ञानिकसमाधानानां बाहुल्यं जातम्। परमनेन प्रकृतौ किञ्चन प्रदूषणं जातम्। अतः प्रदूषणानां निवारणाय पर्यावरणीयसमस्यानां समाधानमन्वेष्टुम् आवश्यकी शिक्षा ।

******

# पर्यावरणशिक्षा

हीरामणि महन्त

क्रम संख्या-८०४

**पर्यावरणं नाम किम्** – अस्मान् परितः यानि तत्वानि विराजन्ते तानि सर्वाणि पर्यावरणमिति नाम्नाऽभिधियन्ते । यथा –वायुः, जलम्, भूमिः, वनस्पतयः, पादपाः, पशवः, तेजांसि, पक्षिणः, मानवाः इत्यादयः । तेषां तत्वानां समाहारः एव पर्यावरणम् ।

**पर्यावरणशिक्षायाः कोऽर्थः**- "पर्यावरणीयशिक्षा सा अस्ति यया शिक्षया विश्वसमुदायः पर्यावरणीयसमस्यामवगत्य समाधानमन्वेषयति तथा भविष्ये आगम्यमानानां समस्यानामवरोधनं करोति"।

**पर्यावरणशिक्षायाः आवश्यकता-** पर्यावरणशिक्षा अधोलिखितकारणैः आवश्यकी-

१. सौरमण्डले 'पृथ्वी' एकः एव ग्रहः वर्तते यत्र जीवनं सम्भवति । यदि इयं हि नष्टा भविष्यति, जीवाय अनुपयुक्ता भविष्यति तर्हि जगति जीवनाभावः भविष्यति तर्हि पृथिव्याः संरक्षणाय शिक्षेयं आवश्यकी ।

२. सर्वासां पर्यावरणीयसमस्यानां मूलकारणमस्ति "जनसंख्यावृद्धिः" । सम्प्रति जनसंख्या वृद्धिः इत्थं भवति येन अस्माकं श्रृङ्खलितं-प्रकृतिचक्रं विश्रृङ्खलितं जातम् । प्रकृतिचक्रस्य व्यवस्थापनाय जनसंख्या वृद्धयवरोधनमावश्यकं भवति । अतस्तदर्थं जनजागरणाय अस्याः शिक्षायाः आवश्यकता वर्तते ।

३. अस्माकं प्रकृतौ संसाधनाभावः न विद्यते । किन्तु अस्माभिः तेषां सम्यक् उपयोगो न क्रियते । अतः प्राकृतिकसंसाधनानां विषये पूर्णज्ञानप्रदानाय शिक्षेयमावश्यकी इति ।

४. सृष्टौ पृथिव्याम् एव पादपाः वनस्पतयः सन्ति ये कार्बन-डाइ-आक्साइड् इति नामकं वायुं, प्राणवायुत्वेन परिवर्तयन्ति । जीवानां कृते आक्सीजननामकः वायुः महदावश्यकः भवति ।

अतः एतदर्थं जीवानां कृते किं करणीयं किं न करणीयम् इति ज्ञानप्रदानाय शिक्षेयं आवश्यकी ।

५. प्रदूषणानां निवारणाय पर्यावरणीयसमस्यानां समाधानमन्वेष्टुं शिक्षेयम् आवश्यकी ।

**पर्यावरणशिक्षायाः उद्देश्यानि-**

१. वायु-जल-मृत्तिकाप्रदुषणम् ।

२. वन्यजीवानां संरक्षणम् ।

३. अनावश्यकमृत्तिकाकर्तनस्यावरोधनम् ।

४. वृक्षाणामनावश्यककर्तनस्यावरोधनम् ।

५.जलप्रदूषणसमस्यानिवारणार्थं, जलस्य महत्त्वविषये च ज्ञान प्रदानम् ।

६. अधिकांशभूमौ वृक्षारोपणकार्यक्रमस्यायोजनम् ।

**पर्यावरणशिक्षायाः महत्वम्-**

१. पर्यावरणज्ञानस्य जनेभ्यः प्रदानम् ।

२.सन्निकटे विषये आगम्यमानानां समस्यानां विषये पूर्वनेव ज्ञानप्रदानम् ।

३. समस्यानां समाधानान्वेषणं ज्ञापनमवबोधनञ्च ।

४. पर्यावरणसंरक्षणं प्रति, सुरक्षां प्रति, सम्बोधनं प्रति च जनानाम् अभिप्रेरणम् ।

५. समस्यामवगन्तुं समाधानमन्वेष्टुञ्च जानानामन्तर्निहितशक्तीनां विकासः ।

६. ज्ञानस्याधारेण पर्यावरणासन्तुलनस्य सम्भावितकारणान्वेषणम् ।

# सत्यवादीवनविद्यालयस्य शिक्षाव्यवस्था

दुर्गाशङ्कर पण्डा
शि.शा- I
अनुक्रमाङ्कः-06

उत्कलमणिगोपबन्धुदासः (१८७७-१९२८) एकाधारेण समाजसेवकः, कविः, शिक्षावित्, समाजसंस्कारकः, पत्रकारः, वाक्कीलः, लेखकश्चासीत् । सः १८७७ तमे वर्षे अक्टोवरमासस्य नवमदिनाङ्के ओडिशाराज्यस्य पुरीजिल्लायाः सुआण्डोग्रामे स्वर्णमयीदेवीदैतारीदासयोः सुपुत्ररुपेण जन्म अवाप्नोत् । बाल्ये विवाहात्परमपि सः स्वोच्चशिक्षां समाप्य जिवीकानिर्वहणार्थं *आइनजीवि* तथा शिक्षकरुपेण कार्यं कृतवान् । परन्तु तस्य मनसि सर्वदा देशभक्तिः तथा समाजसेवाभावना आसीत् । एतदर्थं सः स्वपरिवारं त्यक्त्वा दरिद्रसेवां कृतवान् । अतः तस्य त्यागभावनां दृष्ट्वा जनाः तं दरीद्रसखा इति वदन्ति स्म । तदानीं भारते आंग्लशासकानाम् अत्याचारपूर्णशासनं विरुध्य महात्मागन्धिना आन्दोलनं कृतमासीत् । युवकानां मनसि देशभक्तिः तथा समाजसेवाभावनायाः विकासार्थं गोपबन्धुः १९०९ तमे वर्षे सत्यवादीवनविद्यालयं संस्थाप्य शिक्षादानं प्रारब्धवान् । यत् मनुष्यनिर्माणशाला इत्युच्यते । अयं विद्यालयः पूर्णरुपेण स्वाधीनमासीत् । तत्र आदर्शशिक्षादानपद्धतिः स्वीकृता आसीत् । तद्विषये आलोच्यते ।

यदा आङ्ग्लशासकाः भारते तेषां आङ्ग्लभाषावर्धनार्थं प्रयत्नरताः आसन् तदानीं स्वतन्त्रं भूत्वा उत्कलमणिगोपबन्धुः सत्यवादीवनविद्यालयं संस्थाप्य पुरातनभारतीयशिक्षापद्धत्याः आधुनिकशिक्षापद्धत्याश्च सम्मिश्रणं कृत्वा नूतनादर्शशिक्षापद्धत्या शिक्षादानं प्रारब्धवान् । तेन सह विशिष्टजननेता कविप्रवरः गोदावरीशमिश्रः तथा तदानिन्तन उत्कलविधानसभावाचस्पतिः पण्डितनीलकण्ठदासश्चास्य

आवासिकवनविद्यालयस्य सार्थकतां विस्तारितवन्तौ ।

**आदर्शशिक्षाव्यवस्था**

**०१. स्वल्पव्ययीशिक्षा**

तदानीन्तनसमाजे शिक्षाप्राप्तिः व्ययवहुलासीत् । अत एव अस्मिन् विद्यालये छात्राणां कृते स्वल्पमूल्येन शिक्षादानं, तथा पुस्तकव्यवस्था च आसीत् । स्वल्पव्यी शिक्षा स्यादपि । शिक्षाव्यवस्था सुदृढा तथा चरमगुणयुक्ता आसीत् ।

**०२. व्यवसायिकशिक्षोपरि वलम्**

गोपबन्धोः मतानुसारं शिक्षा केवलं विद्योपार्जनार्थं न, अपि तु जीवनस्य आवश्यकतापूर्तिनिमित्तम् । अतः तत्र व्यवसायिकशिक्षाव्यवस्थापि आसीत् । पठनात् परं कृषिः शिल्पादिकलाशिक्षणमपि प्राचलत् । येन छात्राः स्वजीवने स्वातन्त्राः सन्तः जीवितुं पारयन्ति स्म । अतः तत्र शारीरिकगतिविधीनां वाहुल्यमासीत् ।

**०३.नैतिकशिक्षा**

तत्र शिक्षा धार्मिकी मूल्यशिक्षाधारिता चासीत् । देशस्य कृते सुसंस्कृतसभ्यनागरीकाणां निर्माणमेव तेषां मुख्यमुद्देश्यमासीत् ।

**०४.समाजसेवा राष्ट्रभक्तिश्च**

राष्ट्रस्य कृते पूर्णसमर्पणभावं छात्राणां मनसि उत्पादयितुं शिक्षकाः प्रयत्नरताः आसन् । तथा अकालपरिस्थितिषु जनानां सेवार्थं छात्राः ग्रामान् संभ्रम्य अहर्निशं कार्यं कृतवन्तः । एतद् सर्वं पाठ्यवहिर्भूतशिक्षा आसीत् ।

**०५.मातृभाषाशिक्षायाः मुख्यमाध्यमः**

मातृभाषा एव शिक्षणस्य मुख्यमाध्यमः इति ज्ञात्वा तत्र युवानां संज्ञानात्मकक्षमता, मौलिकता तथा सर्जनात्मक क्षमतायाः अभिवृद्ध्यर्थं मातृभाषया पाठनव्यवस्थासीत् ।

**०६.जातिभेदरहितशिक्षा**

यद्यपि तत्र ब्राह्मणशिक्षकाः आसन्, तथापि तत्र अन्यसाम्प्रदायिकच्छात्राः अपि समानरूपेण पठन्ति स्म । तद्वत् छात्रावासेऽपि निवसन्ति स्म । जातिगतधर्मगतभावनायाः स्थानं तत्र लेशमात्रमपि न दरीदृश्यते स्म ।

**०७.ग्रामीणोन्नयनार्थं शिक्षा**

ग्रामाः भारतस्य हृदयमिति गोपबन्धोः चिन्तनमासीत् । परन्तु ग्राम्यजनाः अशिक्षिताः सन्तः दुःखेन जीवन्ति स्म । अतः तेषां जीवनं सुखमयं कर्तुं छात्राः ग्रामान् अटित्वा जनान् स्वच्छता, शिल्पः, कृषिः, स्वस्थजीवननिर्वहणम् इत्यादषु विषयेषु जागरुकतां प्रयच्छन्ति स्म तथा च रात्रौ प्रौढशिक्षामपि यच्छन्ति स्म ।

**०८.गुरुकुलशिक्षाव्यवस्था**

विद्यालयोऽयं आधुनिकवैदिकगुरुकुलशिक्षाव्यवस्थयोः सम्मिश्रणरूपः आसीत् । अयं वनविद्यालयः नगरात् वहिः वने शान्तिपूर्णवातावरणयुक्तपर्यावरणे तथा सुकरयातायातव्यवस्थायुक्तः आदर्शविद्यालयत्वेन परिलक्षते स्म । यत्र शिक्षकाः गुरुकुलपद्धत्याः ज्ञानं प्रयच्छन्ति स्म ।

**०९.नारीशिक्षा सहशिक्षा च**

वनविद्यालये बालकानां तथा बालिकानां कृते पठनपाठनार्थं समानावसरः आसीत् । गोपबन्धुः स्वस्य सत्यवादी पत्रिकायां नारीशिक्षा विषयान्तर्गतान् बहून् लेखान् लिखितवान् । गोपबन्धुः नारीशिक्षावर्धनार्थं पण्डितनीलकण्ठदासेन गोदावरीशमिश्रेण च सह मिलित्वा महिलाबन्धुसमितिं निर्माय महान्तं पदक्षेपं विहितवान् ।

सत्यवादीवनविद्यालये शिक्षादानव्यवस्था अत्युच्चश्रेण्यां आसीदित्यत्र नास्ति लेशतोऽपि सन्देहस्यावकाशः । पुरातननूतनशिक्षापद्धत्याः सम्मेलनेन आदर्शविद्यालयः अभवत् । परन्तु गोपबन्धोः देहावसानानन्तरं एषः विद्यालयः अवहेलितः सन् अधुना मृतावस्थायामस्ति ।

*****

# भारते मूल्याधारितशिक्षा

DIPIN GHADEI

ROLL NO - 809

Shiksha Shastri 1st year

भारतीयधर्मग्रन्थेषु मूल्यशब्दस्य प्रयोग: 'शील' इत्यस्मिन्नर्थे कृतोऽस्ति । शब्दोऽयं न मूल्यशब्दस्य पर्याय: अपि तु तत्समवाचिशब्द: । अस्य च आङ्ग्लपदं भवति 'Value' इति । 'Value' इति शब्द: लैटिन्भाषाया: 'Valere' इति शब्दतोत्पन्नोऽस्ति , यस्य च अर्थः कस्यचन वस्तुन: मूल्यम् , गुणम् , विशेषताम् उपयोगितां वा सूचयति । इदं मूल्यम् एतादृशी एका आचारसंहिता आहोस्वित् सद्गुणानां समूह भवति । यत् मूल्यधारीकृत्य व्यक्ति: व्यक्तिविकासं कर्तुं समर्था भवति , अत्र मानवस्य धारणा, विचारः, विश्वास:,मनोवृत्तिः तथा स्थिति: च समन्विता: भवन्ति । जीवने शीलमेव (मूल्यमेव) सद्गुणसाधनम् , यत्र शीलं तत्रैव धर्म: सत्यं तेजो वलं च निवसन्ति । नहि जगति किंचिदप्यसाध्यं शीलवताम् , सर्वेषांम् गुणनामाधार: शीलम् , शीलेन त्रिभुवनमपि जेतुं शक्यम् ।

<u>मूल्यानां प्रकारा:</u> ( kinds of values)

१ - नैतिकमूल्यानि (Moral values) , २ - आध्यात्मिकमूल्यानि (Spiritual value ), ३- सामाजिकमूल्यानि( Social values), ४ - शैक्षिकमूल्यानि (Educational values), ५ - राष्ट्रियमूल्यानि (National values), ६ - राजनैतिकमूल्यानि ( Political values), ७ - वैज्ञानिकमूल्यानि ( Scientific values), ८ - पूर्यावरणसम्बद्धमूल्यानि (Enviermental values),९ - क्षेत्रीयमूल्यानि (Regional values)

<u>मूल्यानां स्त्रोतांसि</u> ( Sources of values)

१ - संस्कृति: (Culture) , २ - धर्म: (Religion), ३ - दर्शनम् (Philosophy)

४ - साहित्यम् (Literature) , ५ - विज्ञानम् (Science)

६ - संविधानम् (Constitution) , ७ - सामाजिकनियमा: (Social customs)

८ - इतिहास: (History) , ९ - जनसम्पर्कसाधनानि (Mass media)

सम्प्रतिक प्रपञ्चे यतो हि संघर्ष: प्रचलन् अस्ति । तन्निनिवारणार्थं राजनितौ वा भवतु आध्यात्मिक क्षेत्रे वा भवतु, प्रत्येकस्मिन् क्षेत्रे विश्वशान्तिसद्भावनामैत्रिस्थापनार्थं मूल्याधारितशिक्षाया: महती आवश्यकता वर्तते । समाजस्य विकासाय तथा मानवेषु अन्तर्निहितमानवसुलभप्रवृत्तीनां विकासार्थम् एवं पशुसुलभप्रवृत्तीनां परिहारार्थं मूल्यवोधशिक्षा साहाय्यम् आचरति , येन मानवजीवनस्य सर्वोत्तमलक्ष्यप्राप्ति: भवितुमर्हति ।

*****

# दैनन्दिनी

ग्रीष्मा एन् टि -10

शिक्षाशास्त्री प्रथमवर्षम्

प्रतिदिनम् रात्रौ निद्रायाः पूर्वं किञ्चित् पठनमिति केषाञ्चन जनानां स्वभावः वर्तते । किन्तु अधिकाः अपि माध्यमान् नवमाध्यमान् च दृष्ट्वा तेषु दत्तमानसाः एव समयं यापयन्ति । यदि प्रतिदिनं दैनन्दिनीलेखनस्वभावः भवति चेत् तत् कथं स्यात्? “ दैनन्दिनीलेखनम्?.. तत् पुरातनी खलु सा शैली?..” इति प्रश्नः चेत् एकं कार्यं वक्तुमिच्छामि यत् आधुनिकानि अध्ययनानि कथयन्ति यत् मानसिकस्वास्थ्यार्थं दैनन्दिनीलेखनस्वभावः समीचीनः इति ।

प्रत्येकं दिनस्य कार्याणि तानि यावत् लघूनि वा सङ्कीर्णानि वा भवन्तु स्मृत्वा दैनन्दिन्यां लिखामः चेत् तत् सम्यक् एव । चिन्तनानि सन्तोषपूर्णानि शोकपूर्णानि अथवा निराशापूर्णानि भवन्तु नाम । तानि दैनन्दिन्यां

लिखामः चेत् सुष्ठु तत्सम्बन्धिनां अध्ययनानां अनुसारं येषां दैनन्दिनीलेखनस्वभावः अस्ति तेषां दुःखं विषादश्च न्यूनः भवति । विषादः उत्कण्ठा च यदा जीवने प्रतिनायकत्वेन तिष्ठति तेषां समीपं दैनन्दिनीलेखनं प्रतिदिनं कुर्वन्तु इत्येव निर्दिशन्ति । अन्तर्जाले जालपुटेषु अन्विष्यमाणानां दृष्टिपथे अयं निर्देश एव आगच्छत् ।

तदा एव चित्तमानन्दपूर्णं भवति यदा अस्माकं स्मृतिपथे उत्तममेव तिष्ठति । तथा च शुभमेव प्रतीक्षितुं शक्यते । गतकालस्य तिक्तानुभवान् तथा च भविष्यतः विषये आतङ्कान् च मनसि निधाय जीवामः चेत् खेदः अस्माकं सहयात्रिकः भविष्यति । तादृश्याः चिन्ताः यदि पुस्तके अङ्किताः भवन्ति तर्हि ताः मनसः बहिर्गच्छन्ति । तथैव ताभ्यः दोषकारिणीभ्यः चिन्ताभ्यः मुक्तिं प्राप्स्यति । यदि लिखित्वा सङ्घर्षान् परिहर्तुं प्रयत्नं कुर्मः चेत् बहुसमस्यानां न्यूनता जायते एव । न केवलं तत्, परन्तु जीवनलक्ष्याणि दैनन्दिन्यां लिखित्वा स्थापनीयनि । प्रतिवारं अवलोकनसमये तानि अपि पुरतः आयान्ति । ततः मस्तिष्कं च प्रविशन्ति । अस्माकं स्वप्नानां विषये अपि स्मारयितुं इतोऽपि उत्तमः कः मार्गः अस्ति ? येषां विषये धिषणशक्तिः इति आक्षेपः अस्ति तेषां कृते अपि विना विघ्नं दैनन्दिनीलेखनं उपकारकं सिद्धं भवति । एवं अस्माकं सम्मुखे याः समस्याः उपस्थिताः भवन्ति तासां परिहारं लिखित्वा सम्प्राप्तुं शक्यते ।

दैनन्दिनीलेखनस्य कदाचित् सकृदालोकनेन वयं पुरो गमनमार्गे कियत् अग्रे गतवन्तः इति ज्ञातुमपि शक्यते । आत्मावलोकनं कर्तुं सरलमार्गः एषः। पूर्वं सम्मुखीकृता समस्याः कथं परिहृत्य अग्रे आगताः इति अभिज्ञानं आत्मविश्वासं वर्धयति । तथा च अग्रे गन्तुं स्फूर्तिं च ददाति । यदि आस्माकं अग्रे गमनं यथायोग्यं नास्ति तर्हि तदापि स्वयं ज्ञातुं शक्यते । येन पुनः निश्चितं लक्ष्यं प्रति उन्मुखाः भवितुं शक्नुमः।

दैनन्दिनीलेखनं केवलं समस्याविष्टानां कृते न परन्तु समस्यानिवारणार्थमपि उपकारकमेव । उत्तमस्य आत्ममित्रस्य स्थानं वहति दैनन्दिनी । पक्षपातं विना विषयान् विचारान् च यथातथं सम्यक् शृणोति तथा च तान् अस्माकं समक्षं तथैव स्थापयति च ।

*****

## बुद्धिः(INTERLLIGENCE)

NAME- TOSH KUMAR SAHU
ROLL NO.-811
SHIKSHA SHASTRI 1ST YEAR

समस्यावहुलसंसारे वयं पश्यामः यत् एकः मनुष्यः चातुर्येण समस्यानाम् समाधानं कर्तुम् असमर्थः सन् निरानन्दमयं जीवनयापनं करोति । एतस्य कारणमस्ति संसारेस्मिन् सर्वेषां मनुष्याणां बुद्धिः न समाना । यः

समस्यायाः समाधानं कर्तुं शक्नोति सः बुद्धिमान् इति कथ्यते । अतः यः सहजगुणस्य अन्तर्निहितशक्तेः प्रभावात् एकस्मिन् संसारे अन्यजनानां अपेक्षया पारङ्गमप्रदर्शनं कर्तुं प्रभवति सा क्षमता एव बुद्धिः ।

बुद्धेः परिभाषाः( Definitions of intelligence) :

इयं बुद्धिः मानसिकशक्तिस्मृतिकल्पनाविचारसमयोजनाप्रभृततीनां कार्यकलापानां समाहारः अस्ति । विभिन्नमनोवैज्ञानिकानां मतानि -

- उड्रो :-"ज्ञानाहरणस्य शक्तिः एव बुद्धिः अस्ति ।"
- एल् .एम्.तरम्यान् :-"मनुष्यस्य अमूर्त्तचिन्तनस्य सामर्थ्यं शक्तिः एव बुद्धिः ।"
- थर्णडाइक् :-"सत्यवास्तवतादृष्ट्या उत्तमप्रतिक्रियाप्रदर्शनक्षमता एव बुद्धिः ।"
- कार्लस् स्पियरम्यान् :-"मनुष्यस्य विश्लेषणत्मकक्षमतयाः सारतत्वसंग्रहणस्य सामर्थम् एव बुद्धिः ।

बुद्धेः स्वरुपं (Nature of Intelligence):-

- बुद्धिः व्यक्तेः जन्मगतगुणः अस्ति । परन्तु परिवेष्टन्या प्रभावेण बुद्धिः किञ्चित् विकसिता भवति ।
- इयं एकं निर्दिष्टसामर्थ्यं नास्ति , परन्तु अनेकेषां सामर्थ्यानां समाहरः अस्ति ।
- बुद्धिः निद्धिष्टवर्षपर्यन्तं भवति । साधारणतः अष्टादशवर्षपर्यन्तं बुद्धेः स्तरः अधिकः भवति ।
- शिक्षणप्रक्रियया सह बुद्धेः सम्बन्धः अस्ति । यः शिक्षाक्षेत्रे पारदर्शितां प्राप्तवान् सः बुद्धिमान् इति कथ्यते ।
- बुद्धिः सहजातं तथा स्वतन्त्रम् अस्ति ।

बुद्धेः संज्ञा, प्रकृतिः, कार्यम्, इत्यादिविषयेषु विभिन्नानि तत्वानि मनोवैज्ञानिकैः प्रतिपादितानिः-

## बुद्धेः विभिन्नतत्वानि

**1. एकोपादानतत्वम् :-**

अलफ्रेड् विनेट् ,एल् .एम् .टरम्यान् ,एतौ द्वौ अस्य तत्वस्य समर्थकौ स्तः । एतत्तत्वमाध्यमेन व्यक्तेः सर्वेषु क्षेत्रेषु विकासः भवति । अस्य तत्वस्य इयं दुर्वलता अस्ति यत् व्यक्तेः सर्वेषु क्षेत्रेषु समाननिपुणता न भवति । अतः बुद्धेरेकोउपदानतत्वम् अस्ति ।

**2. द्वि -उपादानतत्वम् :-**

स्पियरम्यान् द्वि-उपादानतत्वस्य प्रवर्तकः अस्ति । तेन उक्तं- बुद्धिः साधारणशक्तिः स्वतन्त्रशक्तिः इति उपादानद्वयेन संघटितास्ति । इयं साधारणश्क्तिः सर्वेषाम् भवति । परन्तु स्वतन्त्रशक्तिः: सर्वेषाम् न भवति । अतः बुद्धिः द्वि-उपादानतत्वे अन्तर्भवति ।

बुद्धि मनुष्यस्य प्रत्येकस्मिन् कार्यकलापे नितरां आवश्यकी, येन माध्यमेन मनुष्यस्य सर्वाषु समस्यासु मुक्तिः भविष्यति । अलफ्रेड् बिनेद्वहोदयैः स्तरानुगुणं बुद्धेः बिभाजनं कृतं वर्तते । तद्यथा :-

| बुद्धिलब्धिः | स्तराणां नामानि |
|---|---|
| २५ त: न्यूनम् | मूढा: |
| २५-५० | बुद्धिहीना: |
| ५०-७० | अल्पबुद्धय: |
| ७१-८० | मन्दबुद्धय: |
| ८१-९० | सामान्यबुद्धि: |
| ९१-१२० | प्रज्ञावन्त: |
| १२०-१४० | उन्नतबुद्धिशालिन: |
| १४० त: ऊर्धम् | अत्युन्नतप्रतिभाशालिन: |

*****

# मूल्यशिक्षायाः स्वरूपम्

ज्योतिर्मयी परिडा
शि.शा.प्रथम वर्षम्
अनुक्रमांङ्कः –813

मूल्यं जीवनस्य सारतत्वं वर्तते । यदि जीवने मूल्यानि नैव सन्ति तर्हि तज्जीवनं निरर्थकमिति । वस्तुतः मूल्यं तदेव तत्वमस्ति, येन मानवः प्राणिषु श्रेष्ठः भवति । मूल्यं नास्ति, तर्हि तस्य वस्तुनः पदार्थस्य, विचारस्य, मानवस्य च किमपि महत्वमेव न भवति । अत एव मानवजीवनं मूल्यमयं कर्तुं बालेभ्यः विद्यालयीयशिक्षायां मूल्यशिक्षा नूनमेव प्रदेया, । तर्हि विद्यालये प्रदीयमानायां मूल्यशिक्षायां के के विषयाः स्युः सा च शिक्षा कीदृशी स्यात् ? विषयेऽस्मिन् शिक्षाशास्त्रिणः चिकीर्षन्ति यत् पाठ्यक्रमनिर्धारणकाले मूल्यशिक्षायाः अधोलिखिताः विषयाः पाठ्यक्रमे समायोजनीयाः, येषामध्यापनेन बालकानां जीवनं मूल्ययुक्तं भविष्यति । तद्यथा-

1.सदाचारपालनम् 2. अहिंसापालनम् 3. सत्यपालनम्
4.मातृपितृगुरूभक्तिः 5.धर्माचरणम् 6.परोपकारः
7.पारलौकिकभावनायाः जागरणम् 8.विश्वबन्धुत्वभावनायाः विकासः 9.समाजसेवा

1.**<u>सदाचारपालनम्-</u>**

सर्वदैव सद्व्यवहारस्य परिपालनं करणीयं भवति । आचारः परमो धर्मः इति सिद्धान्तमाश्रित्य सदाचारः एव सर्वोत्तमं तपः इति जीवने यदि किमपि शाश्वतं तत्वं वर्तते तर्हि तद् वृत्तमेव । चरित्रबलेनैव मानवः दैवत्वं प्राप्नोति, वृत्तस्य प्रशंसायां महाभारतेऽपि उक्तं वर्तते यथा-

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतोहतः।।

सदाचारस्य पालनेनैव मानवाः सुखं प्राप्नुवन्ति । चरित्ररक्षा, शीलरक्षेत्यादयः गुणाः सदाचारपालने अन्तर्भवन्ति ।

2. **अहिंसापालनम्-**

सर्वविधहिंसायाः परित्यागेव अहिंसा, अहिंसायाः पालनाय एव महावीरः, महात्माबुद्धः, महात्मागाँधी, महर्षि दयानन्दः, स्वामी विवेकानन्दः चादयः स्वकीयं जीवनम्अर्पितवन्तः। अहिंसायाः पालनेन आत्मोन्नतिः, राष्ट्रोन्नतिश्च जायते। भगवता पतञ्जलिनाऽपि योगशास्त्रे उद्धरितम्-

**अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः। अहिंसाप्रतिष्ठायां सर्वजनवैरत्यागः इति।**

3. **सत्यपालनम्-**

सर्वदा सत्यभाषणं करणीयं, मिथ्याभाषणं कदापि नैव करणीयं, यतोहि सत्यमेव धर्मस्य मूलाधारो वर्तते । भारतस्य प्रतीकचिह्नमेकमपि अङ्गीकृतमस्ति- सत्यमेव जयते नानृतमिति, सत्यस्य व्यवहारविषये संस्कृतसाहित्ये इत्थं प्राप्यते यत्-

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयातसत्यमप्रियम्।
प्रियञ्च नानृतं ब्रूयात् एष धर्मः सनातनः ।।

4. **मातृपितृगुरूभक्तिः-**

पाठ्यक्रमे इत्थंभूताः विषयाः योजनीयाः, यान् अधीत्य छात्रेषु मातृपितृगुरून्च प्रति आदरभावना उत्पद्येत, मातुः पितुः गुरूणाञ्च आदेशः पालनीयः भवति । ते अस्माकं शुभचिन्तकाः भवन्ति । उपनिषदि अपि प्राप्यते यत्- मातृदेवो भव, पितृदेवो भव आचार्यदेवो भव ।

5. **धर्माचरणम्-**

धर्मः एव जीवनस्य सारभूतः । धर्मो जीवनरक्षकः इत्युच्यते । अत एव धर्माचरणं करणीयम् । यदि वयं धर्मरक्षां कुर्मः तर्हि धर्मोऽपि अस्मान् रक्षति, अतः जगति धर्मः एव सर्वोत्कृष्टः।

एक एव सुहृदधर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यस्तु गच्छति।।(मनुस्मृति 8.17)

6. **परोपकारः-**

परेषामुपकारः परोपकारः इत्युच्यते । समाजे मानवः परस्य जनस्य हितसाधनार्थं यत्किञ्चिदपि मनसा वाचा कर्मणा वा करोति । तत्सर्वं परोपकारत्वेन उच्यते । परोपकारभावनायैव महर्षि

दधीचिः देवेभ्यः स्वशरीरं प्रायच्छत् । महाराजा शिविः कपोतरक्षणार्थं स्वमांसं श्येनाय अददत् । प्रकृतिः तु जगतः परोपकाराय एव इति ज्ञायते श्लोकेनानेन-

पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः।
सन्तः परार्थं धनमर्जयन्ति, स्वभाव एवैष परोपकारिणाम्।।

7. **पारलौकिकभावनायाः जागरणम्-**

जगदिदं नश्वरम् । कीर्तिरेका अविनाशिनी वर्तते । भौतिकाः विषयाः इमे आपातरम्याः पर्यन्तपरितापिनश्च । एषाम् आश्रयणेन पतनं सुलभम्, दुःखावाप्ति सुलभाः,सुखं तु दुर्लभमिति । वीराः धीराः सुकृतिनश्च कर्तव्यं प्रमुखमिति विचिन्त्य विषयसुखानि विहाय, प्राणान् समरादिषु त्यक्तवन्तः । वीरगतिञ्च प्राप्तवन्तः । इयं राष्ट्ररक्षायै समाजरक्षायै च उदात्तभावना छात्रेषु शिक्षया जागरणीया ।

8. **विश्वबन्धुत्वभावनायाः विकासः-**

इदं जगत् सुखदुःखात्मकञ्च भवति । शिक्षया बालकेषु इदृश्याः भावनायाः विकासः सम्पादनीयः, यया ते अन्यजनात् आत्मावदनुभवेयुः । इदं मम, अयं निजः, ते न मदीयाः इत्यादिभावना अपाकरणीया । जगति विद्यमानाः सर्वेऽपि जनाः मम कुटुम्बजनाः इति विचिन्त्य सर्वेषां साहाय्यं करणीयम्। हितोपदेशेऽपि उक्तं यत्-

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।

9. **समाजसेवा-**

समाजसेवा इत्युक्ते समाजे स्थितानां जनानां सेवा इति । यदि समाजस्य उन्नतिः भवति, तर्हि आत्मनः अप्युन्नतिः अस्त्येव । अतः समाजस्य हितसाधनम् तस्याधिकाराणां संरक्षणम्, तत्प्राप्तये च कार्यं विधेयम् । भारते नैके महापुरूषाः आजीवनं समाजसेवां कृतवन्तः। तेषां ध्येयमासीत् यत् नरसेवा नारायणसेवा । विवेकानन्दः, दयानन्दः, सुभाषचन्द्रबोसः, लालालाजपतरायः, सरदारभगतसिंहः, चन्द्रशेखरआजादः इत्यादयः समाजसेवायै स्वप्राणान् अत्यजन् । एते अस्माकम् आदर्शपुरूषाः भवन्ति । अतः एतेषां मतमनुसृत्य अस्माकमपि मुख्यं कार्यं स्यात् समाजसेवा । निष्कर्षरूपेण अस्माभिः वक्तुं शक्यते यत् पाठ्यक्रमस्य निर्माणं तादृशरीत्या करणीयम्, येन राष्ट्रस्य भाविनागरिकेषु जीवनं मूल्ययुक्तं भवेत्, ते राष्ट्रसेवायै समाजसेवायै च सर्वदा तत्पराः स्युः । तेषां नागरिकाणां समग्रं जीवनमपि चरित्रयुक्तं कीर्तियुक्तञ्च स्यादिति ।

*****

## गीतायां आदर्श व्यक्तित्वस्य कल्पना

हरस्मिता राउत
शिक्षाशास्त्री प्रथम वर्षम्
अनुक्रमाङ्क - ८१४

" गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः " । श्रीमद्भगवद्गीता भारतीयसंस्कृतेः प्राणभूता वर्तते । श्रुतीनाम्, स्मृतीनाम्, सर्वोपनिषदाम्, सकलशास्त्राणां च सारभूतं तत्त्वं गीतायां रमणीयतया प्रस्तुतम् । गीता खलु आत्मनः स्वरुपं निरुपयति, स्थितप्रज्ञतां प्रमाणयति, निष्कामकर्मयोगं निष्पादयति, यज्ञादीनां महत्त्वं उद्भावयति, वर्णाश्रमधर्मं प्रकाशयति, ज्ञानयोगं ज्ञापयति, भक्तियोगं भावयति, भगवतो विराड्रूपं च उद्घाटयति । गीता मानव-जीवनस्य आध्यात्मिकबौद्धिक-भौतिकादीनां पक्षाणां विकासाय मार्गनिर्देशनं करोति । व्यक्तेः व्यक्तित्वविकासः कथं भवति इति तत्र निर्दिष्टः अस्ति ।

सामान्यतः व्यक्तित्त्वपदस्य अर्थः भवति सुन्दररुपम् , शारीरिकरचना, आचारः व्यवहारः इत्यादयः । परन्तु एतदतिरिक्ततया सामाजिकगुणाः, कलात्मकगुणाः सौन्दर्यात्मकगुणाः अपि तन्मध्ये अन्तर्भवन्ति । सम्पूर्ण-गीतायां आदर्शव्यक्तित्वस्य निर्माणविषये वर्णितम् अस्ति । परन्तु द्वितीये अध्याये श्लोकसंख्या ५५ -६२ मध्ये स्थितप्रज्ञस्य लक्षणविषये अत्यन्तं सुन्दरभावेन व्यक्तित्वनिर्माणविषये वर्णितम् अस्ति । यथा -

"प्रजाहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते " ।।

अर्थात् यदा मनुष्यः सम्पूर्णकामान् परित्यज्य आत्मना सन्तुष्टः भवति तदा सः स्थितप्रज्ञः इति उच्यते ।

" दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते " ।।

अर्थात् दुःखसमये अनुद्विग्नमनाः सुखेषु निर्गतेच्छः वीतरागभयक्रोधः स्थितप्रज्ञः इति उच्यते ।

" यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता "।।

यादृशरूपेण कच्छपः स्व-इच्छया स्वस्य अङ्गानि वहिः आनयति पुनश्च अन्तः नयति तथैव ज्ञानी जनः स्वस्य इन्द्रियाणां नियन्त्रणं करोति । अतः एतादृशः ज्ञानी स्थितप्रज्ञः इति उच्यते ।

*****

# भारतीयशिक्षाधिनियमः - १८३५

राहुलमिश्रः
शिक्षाशास्त्रीप्रथमवर्षम्
अनुक्रमाङ्कः - ८१७

भारतं नाम न केवलं पराधीनराष्ट्रम् अपि तु यावत्पर्यन्तम् आङ्ग्लाः नागतवन्तः तावत्पर्यन्तम् अविकसितमासीत् इति अस्माकं चिन्तनं भवति । परन्तु भारतमेकं समृद्धम्, धनशालि, विश्वगुरुराष्ट्रमासीत् । अस्य प्रमाणम् अस्माकं साहित्यादिषु, ग्रन्थेषु च बहुत्र बहुधा दृश्यते । कश्चन आङ्ग्लाधिकारी टि. वि. मेकोले १८३५ खिष्टाब्दे स्वविवरणवेलायां भारतवैशिष्ट्यविषये भणति यत्पेरिस् बर्लिन् हेम्बर्ग मोस्को सिकागो न्युयार्क् लण्डन् इत्यादिनगराणां सम्पूर्णधनं भारतस्य सूरतनगरस्य सम्पूर्णधनादपि न्यूनमस्ति । भारतम् एतादृशम् उन्नतमस्ति तस्य शिक्षाव्यवस्थाकारणादेव, तदर्थं तत्र पराश्रयता, वृत्तिहीनता, कुत्सितमानसिकता निरक्षरता च न कुत्रापि दृश्यते । भारतस्य दक्षिणभागे सर्वाधिका अष्टनवतिः प्रतिशतम्, उत्तरे द्व्यशीतिः प्रतिशतम्, पश्चिमे अष्टनवतिः प्रतिशतम्, तथा च अवशिष्टभागेषु सप्ताशीतिः प्रतिशतं साक्षरता वर्तते । भारते ७३२००० राजस्वग्रामाः सम्प्रति विराजन्ते । अपि च प्रत्येकस्मिन् ग्रामे पठनपाठनाय गुरुकुलं भवति । तत्रापि वृहत्तमगुरुकुलं २०००० विद्यार्थीविशिष्टमस्ति, लघुतमं२००विद्यार्थीविशिष्टञ्च । तेषु गुरुकुलेषु आदौ एकः अध्यापकः एकं छात्रसमुहं पाठयति , सः छात्रसमूहः पुनः तस्य अधस्तनछात्रसमुहान् पाठयति । एते पुनः तेषाम् अधस्तनछात्रान् पाठयन्ति । एवं क्रमेण कक्ष्यानायकीयपद्धतिमाध्यमेन (Monitorial Educational system) विशालगुरुकुलस्यापि शिक्षणं सुचारुरूपेण अग्रे सरति । यस्य अध्यापकस्य हस्ते २०००० छात्राणां शिक्षणदायित्वम्, गुरुकुलस्य च दायित्वं न्यस्तं भवति सःअध्यापकः कुलपतिः इत्युच्यते ।

भारतीयाःब्राह्मणक्षत्रियवैश्यशूद्राः इति चतुरः वर्णान् मन्वते येभ्यः वर्णेभ्यः छात्राः आगच्छन्ति । भारते सर्वछात्रेभ्यः शिक्षा दीयते । दक्षिणभारते शूद्रछात्राः, उत्तरे च क्षत्रियछात्राः अधिकाः सन्ति । पश्चिमे ब्राह्मणवैश्यच्छात्राणाम्, तथा अवशिष्टभारते सर्ववर्णानां छात्राणां सङ्ख्या समाना अस्ति । केवलं तत्र दक्षिणभारते महिलाछात्राः अपि अधिकाः विद्यन्ते । तत्र ५८ प्रतिशतं महिलाः, ४२ प्रतिशतञ्च पुरुषच्छात्राः सन्ति । एतादृशी स्थितिः समग्रभारते विद्यते । महिलाछात्राणामध्ययनाय अध्यापिकाः भवन्ति, पुरुषच्छात्रेभ्यः अध्यापकाश्च । सर्वेण गुरुकुलेन साकम् उच्चाध्ययनकेन्द्राणि संश्लिष्टानि यत्र अध्यापकाः प्रशिक्षणं प्राप्नुवन्ति ।

गुरुकुलेषु छात्रेभ्यः वैदिकगणितम्, खगोलशास्त्रम्, धातुविज्ञानम् (Metallurgy), हस्तशिल्पः (घटनिर्माणम्, कृषिः, लौहकर्म, वांशकर्मादिकम्), ग्रहविज्ञानम्(Astrophysics), रसायनशास्त्रम्, चिकित्साशास्त्रम् {औषधविज्ञानम्(Medicine), शल्यक्रिया(Surgery)} इत्यादीनाम् अष्टादशविषयाणाम्,

आध्यात्मिकतायाः अपि ज्ञानं दीयते । परीक्षायै छात्रेभ्यः विषयाधारितानि कानिचन कार्याणि दीयन्ते । कार्यकुशलतानुसारं छात्राः उत्तीर्णाः उत अनुत्तीर्णाः भवन्ति ।

अधुना प्रायः १५८०० विश्वविद्यालयाः (Higher Studies Centres) समग्रभारते प्रचलन्तः सन्ति । एतेषां वैशिष्ट्यं यत्प्रत्येकोऽपि विश्वविद्यालयः कस्मिन् एकस्मिन्विषये निपुणः भवति । धातुविज्ञानविषये अमरावतीविश्वविद्यालयः निपुणः अस्ति यः धातुविज्ञानिभिः परिपूर्णः । धातुविज्ञानं नाम भूपृष्ठात्लौहस्वर्णरजतताम्रादीनां पृथकीकरणम्(Extraction), लौहात्कलङ्कनिरोधकानाम् उपकरणानां निर्माणादिकं भवति । पुनः या शल्यक्रिया एकस्य अङ्गस्य चर्म निष्कास्य अन्यस्मिन् अङ्गे स्थापनाय (Skin Graphiting) समर्था, तादृश्याम् उच्चस्तरीयशल्यक्रियायां (इदानीन्तन Rhynoplastic Surgery) काङ्गडाविश्वविद्यालयस्य निपुणता वर्तते । तत्रत्यशल्याचार्येषु पञ्चशतं प्रकारकाणि उपकरणानि तु सामान्यतः भवन्त्येव तथा च सर्वाणि उपकरणानि उच्चस्तरीयकलङ्कनिरोधकलौहनिर्मितानि भवन्ति । उत्कृष्टकृषिपद्धतिभ्यः तमिलनाडुस्थानि गुरुकुलानि सन्ति प्रसिद्धानि । ताः कृषिपद्धतयः एकस्मात् एकरपरिमितायाः भूमेः ५६ क्विण्टाल्परिमितानि धान्यानि उत्पादयितुं समर्थाः भवन्ति ।

अपरः एकः आङ्ग्लाधिकारी विलियम्जेंस् गुरुकुलानां समाजोपयोगिताविषये तस्यविवरण्यां लिखति यत्विशाखपट्टनसमीपस्थस्य एकस्य गुरुकुलस्य छात्राः अध्यापकाश्च मिलित्वा सर्वप्रथमः प्रस्तरनदीबन्धः १२३८ ख्रिष्टाब्दे कावेर्यां निर्मितवन्तः । कावेरीनदी अतिक्षिप्रगामिनी भवति यस्यां एषः नदीबन्धः अस्ति । आश्चर्यस्य विषयः यत्सः नदीबन्धः तस्य विचित्रनिर्माणशैलीकारणात् सम्प्रत्यपि जीवितः अस्ति ।

समृद्धभारतस्य कारणरूपायाः एतादृश्याः सुदृढाशिक्षाव्यवस्थायाः विषये वर्णनं कृत्वा ब्रिटिशसंसदि (House of Commons) टि. वि. मेकोले वदति – यावत्पर्यन्तं वयं भारतीयशिक्षाव्यवस्थां न अनङ्क्ष्याम तावत्पर्यन्तं भारतम् अस्माकमधीनं न अभविष्यत् ।

तदनन्तरं ते वैदेशिकाः भारतीयशिक्षाधिनियमः (Indian Education Act) नामकं नियमं निर्माय भारते तं नियमं प्रणीतवन्तः । तन्नियमानुसारं संस्कृतमाध्यमिकानि, मातृभाषामाध्यमिकानि च सर्वाणि गुरुकुलानि अवैधानिकानि सन्ति इति । ये ये तं नियमं नाङ्गीकृतवन्तः, वैदेशिकाः तेषाम् अवयवच्छेदं, हत्यां च कृतवन्तः । बहूनि गुरुकुलानि ज्वालितवन्तश्च । एवं क्रमेण प्रताडनं कृत्वा सर्वाण्यपि गुरुकुलानि अनाशयन् । पुनश्च आङ्ग्लशिक्षायाः प्रसाराय कन्वेण्टविद्यालयान् स्थापितवन्तः । परिसङ्ख्यानानुसारं वैदेशिकानां भारतात्प्रतिगमनसमये भारते ३५० सङ्ख्याकाः कन्वेण्टविद्यालयाः आसन् । परन्तु इदानीं तेषां सङ्ख्या वृद्धिं प्राप्य लक्षाधिकाः जाताः, यत्र पाश्चात्यसंस्कृतेः शिक्षा, आङ्ग्लशिक्षा च प्रदीयते । तेभ्यः विद्यालयेभ्यः आगच्छन्तः छात्राः शारीरिकरूपेण तु भारतीयाः भवन्ति परन्तु मानसिकरूपेण वैदेशिकाः । भारतं बहुकालात्पूर्वं स्वाधीनं

जातं परन्तु सम्प्रत्यपि मानसिकस्तरे बौद्धिकस्तरे च पराधीनमस्ति । एतदेव कारणमस्ति यत्स्वाधीनतायाः परम् एतावान्कालः अतिवाहितः किन्तु भारतमिदानीमपि विकासशीलं न तु विकसितम् ।

भारतं पुनरेकवारं विश्वगुरुस्थाने प्रतिस्थापनाय, च आङ्ग्लशिक्षायाः नाशः, संस्कृतशिक्षापद्धतेः पुनरुज्जीवनमत्यावश्यकम् अस्ति । एतत्कार्यमस्ति भारतसर्वकारस्य, सर्वेषां भारतीयानाञ्च ।

*****

## शिक्षायाः महत्वम्

Jachindra Kumar Behera
Shiksha Shastri 1 st Year
Roll No-18

अखिलेऽस्मिन् ब्रह्माण्डे वैदिककालादद्याविधि समेषां मानवानामाध्यात्मिकचारित्रिक-बौद्धिक-सामाजिक विकासमुन्नेतुं प्रकाशमानञ्च कर्तुं प्रभवति शिक्षा । शिक्षैका गतिशीला विकासपक्रिया वर्तते । यथा शिक्षया मानवः मानवत्वं प्राप्नोति । शिक्षादर्पणमिव कार्यं सम्पादयति । यथा दर्पणमवलोक्य मानवः स्वीयं वास्तविकं स्वरुपं वेत्ति तथैव शिक्षया मानवः स्वास्तित्वबोधं कर्तुं प्रभवति । एवञ्च शिक्षाया एव मानवः सभ्यतां , सुशीलतां व्यवहारम् ,आहारं ,ज्ञानविज्ञानम् ,कर्माकर्मं ,धर्माधर्मं ,विद्यामविद्यां च वेत्ति उक्तञ्च-

सत्याचार-विचारशिक्षणपरा सर्वाङ्गिकीमुन्नतिं
छात्राणां विद्धद्विवेक-विनयाचार-प्रचारैकधीः
चारित्र्योन्नतिसाधिका गुणगुणैः सारल्यसंसाधिका
लोकेषु प्रचरेत् शुशिष्यजनिदा शिक्षा सदा कामधुक् ।।

संस्कृतसाहित्ये शिक्षायै विद्या ज्ञानम् इत्यादयः शब्दाः प्रयुक्ताः दृश्यन्ते । विद्याग्रहणमिति शिक्षायाः विद्यापदेनापि व्यवहारः सस्कृतवाङ्मये दृश्यते । एवञ्च शिक्षाशब्दस्य पर्यायवभ्दवति विद्याशब्दः ।
' **विद्यया विन्दतेऽमृतम्** ' ' **विद्यायाऽमृतमश्नुते** ' '**सा विद्या या विमुक्ते** ' – इत्यादि श्रुतिभ्यः पुर्वोक्ताभिप्रायस्य साधुकरणं जातम् । शिक्षायाः महत्वं स्पष्टं कुर्वन्तः अनेके कवयः भूरिशः लिखितवन्तः ।

" विद्या नाम नरस्य रुपमधिकं प्रच्छन्नगुप्तं धनम् "

विद्येयं साक्षात् कल्पलतेव संसारेऽस्मिन् विद्यते । विद्यया अस्मिन् जगति सर्वाणि कार्याणि साधयितुं शक्यन्ते उक्तञ्च-

" किं किं न साधयति कल्पलतेव विद्या "विद्या सर्वेषु धनेषु श्रेष्ठास्ति । यतो हि विद्यैव व्यये कृते वर्धते । अन्यधनं व्यये कृते क्षयं प्रप्नोति । अत एवोक्तम्-

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति
व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ।।

तादृशस्य ज्ञानस्य महिमा अवर्णनीयो भवति । ज्ञानात् ऋते न हि किञ्चित् प्रशस्यतमं वर्त्तते इहलोके । ज्ञानं हि सर्वापेक्षया पवित्रं मन्यते ।

शिक्षा मानव-जीवनस्याभिन्नमङ्गं वर्तते , शिक्षयैव मानवजिवनस्योद्देश्यानां पुर्तिर्भवति । प्रणिमात्रेषु मानवस्य सर्वोत्कृष्टता अपि शिक्षयैव सिद्धयति । यतो हि शिक्षितो हि मानव उचितानुचितस्य विवेचनपूर्वकमाचरणं कर्तुं व्यवहर्तुं वा समर्थो भवति । संवेगनियन्त्रणे परिस्थितिषु च सामञ्जस्यस्थापने शिक्षितो हि जनः समर्थो भवति । अतः समाजे सर्वासु परिस्थितिषु समञ्जस्यस्थापने शिक्षायाः नितरामावश्यकता महत्वञ्च वर्तते एव ।

*****

## कर्मणि एव अधिकारः

नामः-रजनीगन्धा साहु
शाक्षा.शास्त्रिप्रथम बर्ष
अनुक्रमाङ्क-१९

भगवतः श्रीकृष्णस्य एष उपदेशः व्यवहारदृष्ट्या अपि सार्वत्रिकः सार्वजनीनश्च अस्ति । यो हि मानवः यादृक् कर्मणा संलग्नो भवति ,अद्य श्वः वा सः नूनं तस्य फलभाग् भवति भविता वा तदर्थं श्रीकृष्णेनोक्तम् -

" कर्मणैव हि संसिद्धिमास्थिता जनकादयः
लोकसंग्रहमेवापि संपश्यन् कर्तुमहसि ।।

अस्मात् ज्ञायते यत् कर्मणः शास्त्रीयलौकिकसमाधिकारः वत्तते । गीतानुसारं त्यागो भवति त्रिविधः सात्विकराजसतामसभेदैः । तेषु संख्यातीत्येषु कर्मसु यज्ञदानतपोरूकर्मणां त्यागो त्रिविधः । यतो हि यज्ञ-दान-तपांसि फलेच्छारहितानि । अनासक्त्या भगवदर्थ कर्मपरायणं मनीषिणः सदा पावयन्ति । अत एतानि अपि कर्माणि फलानि च विहाय कर्तव्यानि भवन्ति । वर्णधर्मानुसारं श्रीकृष्णः कर्मणां विभागमारभते ।तद्यथा-

"शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च
ज्ञानं विज्ञानमास्तिक्यं विप्रकर्म स्वभावजम्
शौर्य्यं तेजो धृतिर्दीक्षं युद्धे चाप्यपलायनम्

दानमीश्वरभावश्च क्षात्रं कर्मस्वभावजम् ।।
कृषि गौरक्षवाणिज्य वैश्यकर्मस्वभावजम्
परिचर्य्यात्मकं कर्म शूद्रस्यापि स्वभावजम्

एवं प्रकारेण चातुवर्ण्यस्य कर्मणां संक्षेपेण वर्णनं विधाय निर्दिशति श्रीकृष्णः –

"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः "

स्वकर्मविरतो मानवः कर्मयोगेन भाग्यमपि परिवर्तयितुं पारयति । ये च मानवाः " कार्यं वा साधयेत् शरीरं वा पातयेत " इति मन्त्रोच्चारणदीक्षिताः भवन्ति । ते नूनं भुवने कृतकार्या भवन्ति । अत एव भगवता श्रीकृष्णेन भगवद्गीतायां स्पष्टरुपेण स्वीयम् अभिमतं प्रतिपादितम्-

" कर्मण्येवाधिकारस्ते मा फलेषु कदाचन
मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ।।

*****

# शिक्षा

राज्कुमारी कुजुर
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमांक-824

सर्वे धनिनः निर्धनाश्च देशस्य प्रगतिं कामयन्ते इति तु सत्यम् । जनाधिक्ये ग्रामाधिक्ये च भारते तत्सदृशे राष्ट्रे वा अनेके हि जनाः दरिद्राः इति कृत्वा देशस्य प्रगतेः प्रचेष्टायाः अर्थः भवति अर्थनैतिकविकासदिशि चिन्तनम् इति । किन्तु खेदस्य विषयः यत् स्वातन्त्रस्य द्विषष्टेः वर्षाणाम् अनन्तरमपि देशे सामान्यजनानां जीवनधारणमूल्यस्य जीवनमूल्यस्य च विशेषपरिवर्तनं नावलोक्यते इति। देशात् दारिद्र्यस्य दूरीकरणं कर्मनियुक्तिः इत्यादीनां समस्यानां समाधानाय अत्यधिकव्ययेन प्रस्तुतायां योजनायामपि सुमहान् परिणामः जनेषु प्रसृतः इति न दृश्यते। मानवविकासस्य शिक्षा अनिवार्या। अस्मद्देशस्य शिक्षाव्यवस्था एव शिक्षितनिरुद्योगितां समस्यां जनयति। श्रमशक्तेः गुणात्मकमूल्यवर्धने जनानां दृष्टिपरिवर्तने च शिक्षा असफला प्रतीयते। स्वदेशशक्तिसर्जनं, सञ्चयाभिवृद्धिः, अर्थनियोजनार्थं ज्ञानाहरणं, प्राकृतिकनिधेः सफलव्यवहारः, वृत्तिगतव्यवस्थायां परिवर्तनम् इत्यादीन् विषयान् अवलम्बते देशस्य प्रगतिः। एतत्सर्वं मूलबोधशिक्षाव्यवस्थाद्वारा एव सम्भवेत्। एतन्निमितमपि देशे राजनैतिकस्थिरता, अनुशासितप्रशासनं च अन्यतममनिवार्यम्।

यस्य देशस्य शिक्षाव्यवस्था उन्नता, तत् देशं तावत् प्रगतिशीलम्। शिक्षाव्यवस्थायां नैतिकत्वं, बौधिकत्वं, सामाजिकत्वं, धार्मिकत्वं, आध्यात्मिकत्वं चेत्यादीनि तत्त्वानि सन्निविष्टानि स्युः। अतः प्रचलितायां राष्ट्रियसर्वकारिकार्ये शिक्षाव्यवस्थायाम् अपेक्षितसंस्कारं सम्पाद्य शिक्षायाः मूलवृद्धये शिक्षासंस्थानानां बौद्धिकविकासे च अधिकं महत्वं प्रदेयम्। तदैव शिक्षा विकासस्य निर्णायिका भवितुम् अर्हेत्।

सत्याचारः विचारशिक्षणपरा सर्वाङ्गिकीमुन्नतिं छात्राणां विदधत् विवेकविचचाचाप्रचारैकधीः। चारित्र्योगतिसाधिका गुणगणैः सारल्यसंसाधिका लोकेषु प्रचरेत् सुशिष्यजनिदा शिक्षा सदा कामधुक्।।(कपिलस्य)

अखिलेस्मिन् ब्रह्माण्डे वैदिककालादद्यावधि सर्वेषां मानवानामाध्यात्मिक-चारित्रिक-बौद्धिक-सामाजिकविकासमुन्नेतुं प्रकाशमानं च कर्तुं प्रभवति शिक्षा । शिक्षा गतिशीला विकासप्रक्रिया वर्तते, यया मानवः मानवत्वं प्राप्नोति । एवञ्च शिक्षया एव मानवः सभ्यतां सुशीलतां, व्यवहारम्, आहारं, ज्ञानविज्ञानं, कर्माकर्म, धर्माधर्म, सत्यासत्यं, विद्यामविद्यां च वेति ।

*****

## श्रीमद्भगवद्गीतायां शिक्षायाः महत्त्वम्

सीमा लाक्रा
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमांक- 826

श्रीमद्भगवद्गीता भारतीयसंस्कृतेः, वैदिकदिव्यज्ञानस्य आत्मतत्त्वानुभवस्य प्राच्यविद्यायाः वैज्ञानिकतायाश्च प्रत्यक्षं प्रमाणं वर्तते । श्रीमहाभारते अर्जुनमुद्दिश्य तस्यैव मोहनाशनव्याजेन सम्पूर्णस्य समाजस्य, सम्पूर्णमानवजातेश्च कृते भगवता स्वमुखेन दिव्यज्ञानं परिप्रकाशितम् । इदमेव दिव्यज्ञानं भगवन्मुखनिसृतत्त्वेन उपनिषदामपि महत्त्वमतिशेते । अत एवोक्तम्

गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिसृता।।

गीतायां जाति-वर्ण-धर्म-सम्प्रदायादिनिरपेक्षेण सर्वेषां कृते उपदेशाः प्रदत्ताः। यत्र नियतं कुरु कर्मस्त्त्वं इति उपदिशता भगवता कर्मणः श्रेष्ठत्वं प्रतिपादितम्, तत्रैव "**सर्वकर्माखिलं पार्थ ज्ञाने परिसमाप्यते**" इति निर्दिशता ज्ञानस्यापि महामहिमत्वं व्यक्तीकृतम् । एवं रूपेण भगवद्गीता कर्म-ज्ञान-चकितरूपायां त्रिवेण्यां

विश्वमानवमवगाहयन्ती सर्वेषां परमकल्याणस्य मार्गं प्रस्तौति । गीता न केवलं पारमार्थिकं शास्त्रमपि तु एषा व्यावहारिकविद्यामपि शिक्षयति । तथाहि-

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।

युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ।।

विद्या विनयसम्पन्नो - - - पण्डिताः समदर्शिनः ।।

विदितचरमेवेदं समेषामपि निखिलजनप्राणिनां श्रीमद्भगवद्गीतायाः गुणगौरवम् । सर्वविषयगुम्फितत्त्वमिदं मानवजातेः सर्वश्रेष्ठज्ञानाधारत्वमावहति । गीतायां विशिष्टया सरलया शैल्या मोहगतस्य अर्जुनस्य मोहनाशनाय कार्यं वा साधयेयं शरीरं वा पातयेयमिति मन्त्रमुपदिशति स्वयं भगवान् । अर्जुनाय उपदेशप्रदानच्छलेन विश्वगुरुणा भगवता श्रीकृष्णेन समग्रमानवजातेः हिताय, जगतः सर्वासां समस्यानां समाधानाय च गीताग्रन्थे उपायः प्रस्तुतः । मोहमायान्धकारे जडितः मानवः कथं मुच्येत, कथं वा चैतन्यरूपस्य सर्वशक्तिमतः सच्चिदानन्दस्वरूपस्य च दर्शनं प्राप्यते ? इति हेतोः तेन उपदेशः प्रदत्तः। कर्त्तव्यपालानान्तरेण लोकयात्रापि नैव प्रवर्तेत इत्युपपादयता उपस्थाप्यते-

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।

भगवतः श्रीकृष्णस्य मुखान्निस्सृस्य परमपावनगीताग्रन्थस्याध्ययनं मानवजीवनं ज्ञानानन्देन प्लावयति, दुःखद्वन्द्वानि नाशयति, सत्यपथं प्रदर्शयति च । गीतायाः मूल्यं न केनापि कलयितुं शक्यते ।

*********

# संस्कृतसाहित्ये जीवनमूल्यानि

मृत्युञ्जयशास्त्री

शि.शा.प्र.वर्षम् अनुक्रमाङ्कः २९

मानवधर्मयुक्ताः तथा संस्कृतिबोधकवचनभूयिष्ठाः न केवलं भारतीयैः परिगृहिताः वैदेशिकैरपि समादरणीयाः जातिमतभेदरहिताः सर्वेषां सार्वकालिकाः जीवनदीपसदृशाः मनुकुलोन्नतनैतिकसिद्धान्ताः एव "**संस्कृतसाहित्य**" इति शब्देन अभिधेयाः। एतानि संस्कृतसाहित्यानि "**जंतूनां नरजन्म दुर्लभम्**" इति मानवानां जन्मतः आरभ्य "**अनायासेन मरणम्**" इत्यादि आजीवनं मौल्ययुक्तवाक्यस्रोतैः जीवनं पावनं कुर्वन्ति । नराणां जीवनपथे संभविष्यमाणानां आदिव्याधीनां दिव्यौषधवत् समाचरंति च । अत एव स्वामीविवेकानन्दमहोदयेन भणितं "**नेदं स्थगितप्रवाहं संस्कृत साहित्यम् । तच्च अनवतरं प्रवाहमाना जीवनगंगा**" इति ।

अखिलसंस्कृतसाहित्ये जीवनमूल्यानां अन्वेषणं नाम **"विशालसागरे लवणान्वेषणवत् भवति"**। एवं संस्कृतसाहित्यजीवनमूल्ययोः अस्ति अविनाभावः संबन्धः । तथैव **"संस्कृतमेव संस्कृतिः, संस्कृतौ एव मौल्यानि"** अनेन प्रकारेण मानवजीवनसारः एव अत्र विलसति । संपूर्ण संस्कृत साहित्यमेव परमश्रेष्ठमस्ति । पंचमवेदाभिदेया महाभारत, भगवद्गीता, उपनिषदः, चत्वारो वेदाः, स्मृतिः पुराणानि, रामायणमहाभारतादि-इतिहासाः, शास्त्राणि, काव्यानि च प्रत्येकं एकैकं रत्नमेव । सर्वाण्येतानि प्रतिपदं मानवजीवने भवनस्य शंखशिलावत् उगमसंस्कारं निर्माति ।

भगवता प्रदत्तानि वैदिकसाहित्यानि **"सत्यं वद धर्मं चर" "कृतं स्मर"** इत्यादीनि वाक्यानि सार्थकजीवनेन सह मुक्तिमार्गं प्रदर्शयन्ति । **"कर्मण्येवाधिकारस्ते माफलेषु कदाचन"** भगवद्गीतावाक्यमिदं कर्मणः प्रामुख्यतां प्रतिपादयति । पूर्वजानां दैवीसंपदः धर्मरक्षणार्थमेव उज्जीविताः । ताः एव इदानीम् जीवनमूल्यत्वेन संगृहीताः । अत एव भगवान् श्रीकृष्णः आह **"धर्मसंस्थापनार्थाय संभवामि  युगे युगे"** इति । विचिन्तयंतु,अद्यापि भगवद्गीता तथा वेदादयः  जीवनमार्गं दिशन्तस्सन्ति खलु । एवमेव सुभाशितानि पुराणवाक्यानि च मानवमूल्यानानि संप्रसारयन्ति । इदं सर्वं मानवजीवने कार्याकार्यविवेकपूर्वकम् ज्ञानं दत्वा मानवजन्म पवित्रीकरोति ।

आचार्यशंकरेण  विवेकचूडामणि ग्रन्थे

**"इतः कोन्वास्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति ।**
**दुर्लभं मानुष देहं प्राप्य तत्रापि पौरुषम् ॥"** इत्युक्तम् ।

एवमेव ऋग्वेदे अपि

**"आस्ते भग आनेनस्य ऊर्ध्वं तिष्ठति तिष्ठतः।**
**शेते निपद्यमानस्य चराति चरतो भगः ॥"** इति प्रतिपादितम् मानवस्य क्रियाकौशलम्।

**"विद्ययामृतमश्नुते" "सत्यमेव जयते"** इत्यादीनि वाक्यानि जीवनस्य महत्वं संपादयन्ति । उदाहरणरूपेण कानिचन वाक्यानि एव प्रदर्शितानि । परन्तु सर्वमपि संस्कृतसाहित्यं एवमेव । अतः संस्कृतसाहित्यं सागरवत् महत्वं बृहत्वं भजते । तेषां सारः एव अमृतवद्भाति । संस्कृत साहित्यस्य आमूलाग्र-अध्ययनादेव मौलिकजीवनं साध्यम् । तैरेव स्वस्थसमाजः तथा संस्कृतेः पुनरुत्थानम् । तस्मात् वयमपि तादृशमार्गे एव चरामः । मौल्ययुतजीवनं संपादयेम ॥

*****

## ज्ञानं विज्ञानसहितम्

दिप्तिमयी दास
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमांक 834

यथार्थतया अवगमनं ज्ञानम् । ज्ञातस्य प्रयोगेण विशेषेण परीक्षितस्य, निश्चिततत्त्वस्य , स्वप्रतिभायाः यथोपयोगं परीक्षितुं क्रियमाणेन प्रयत्नेन निष्पन्नं विशिष्टं ज्ञानं विज्ञानम् । बहुकालपर्यन्तं मानवः ज्ञानप्राप्तये उपकारकं ज्ञानम् । किन्तु तावत् अधिकं प्रयोजनं न जातम् ।

यद्यपि मानवकुलस्य जन्म भूग्रहे लक्षाधिकवर्षेभ्यः पूर्वं जातं स्यादिति ऊहितं, तथापि विज्ञानस्य इतिहासः केवलं कतिपयशतकदीर्घः । चिन्त्यतां तावत् शतद्वयवर्षेभ्यः प्राक् प्रपञ्चः कीदृशः आसीदिति । ग्रामात् ग्रामं गन्तुं बलीवर्धशकटं, अश्वं गर्दभं वा आश्रयन्ति स्म । कियान् श्रमः कियान् कालः ? । अद्यत्वे यथा यः कोऽपि नगरात् नगरं सलीलं याति, तथा न शक्यमासीत् । अद्य देशान्तरस्थानादीनि दूरदर्शनद्वारा वयं पश्यामः, तेषां भाषितं शृणुमः। दूरवाणीद्वारा तैः साकं संभाषितुं शक्नुमः । पुरा ऋषयः योगद्वारा एव सभाषणादिकं कुर्वन्ति स्म इति कथाः सन्ति । परन्तु इदानीं तु सर्वमपि एतत्सुलभम् ।

पूर्वकाले जनाः विविधैः रोगैरपीड्यन्त । रोगज्ञानं तेषामासीत् । ततस्तु चरक -शुश्रुतादयः विज्ञानिनः तेषां रोगाणां परिहारप्रयोगद्वारा औषधानि गवेषयन्ति स्म । गते शताब्दीद्वये तु विज्ञानस्य प्रगत्या न केवलं यस्य कस्यचिद् रोगिणः दुःखपरिहारः अपि तु रोगाणां मूलोत्पाटनमेव विज्ञानिभिः साधितम् । पूर्वकालापेक्षया अद्य जनानाम् आरोग्यं सम्पन्नमिति वचसि नातिशयोक्तिः । यद्यपि नूतनाः केचन रोगाः प्रादुर्भूताः सन्ति, तथापि तेषां नियन्त्रणं करिष्यन्ति वैज्ञानिकाः इत्यत्रापि न संशयः ।

किं तर्हि आधुनिकविज्ञानं मानवकुलस्य सर्वथा सौख्यदायि ? न इति ब्रूमः । दृष्टं किमपि लोकेऽस्मिन् न निर्गुणं न निर्दोषम् । विज्ञानेन अपि काचिद् हानिः कृता । अत्र न संशयः । विज्ञानेन आविष्कृतानि मारकाणि आयुधानि महत्तरां हानिं जययन्ति । एकमेव अण्वस्त्रं लक्षाधिकान् जनान् ध्वंसीकरोति । नूतनानि नगराणि वायु-जल-स्थलमालिन्यं कृत्वा जीवितमेव दुर्भरं कुर्वन्ति । कृमिनाशकानां सातत्योपयोगः सर्वमपि खाद्यं विषमिश्रितं करोति । वाहनापघाताः प्रतिवर्षं लक्षाधिकान् जनान् यमपुरीं प्रेषयन्ति, अत्यधिकान् भग्नावयवान् यातनाक्लिष्टान् च कुर्वन्ति ।

किन्तु मुख्यः एकः प्रश्नोऽत्र विद्यते । अत्र विज्ञानस्य को दोषः ? हस्तस्थेन तीक्ष्णाग्रेण कुठारेण दारुच्छेदनमपि कर्तुं शक्यं, हस्तच्छेदनमपि । अग्निना पाकोऽपि कर्तुं शक्यते, गृहदाहः अपि । एतादृशः विवेकः यदि भवति तर्हि साधनेन महत्प्रयोजनम्, अन्यथा महान् विनाशः । तत्र साधनस्य कोऽपि दोषो नास्ति । इत्थं

विज्ञानस्य विज्ञानिनां वा दोषो नास्ति । किन्तु विज्ञानस्य उपयोगं कर्तुं अधिकारो येषां हस्तेऽस्ति, ते एव दोषभाजः भवन्ति ।

विज्ञानेन हानिः यथार्थतया न स्यात्, तथा तदुपयोगे शक्तिं ज्ञानमेव जनयति । ज्ञानं विना विज्ञानं हानिकारकम् अपि स्यात् । विज्ञानं विना ज्ञानं निरुपयुक्तं स्यात् । उभयोः आवश्यकं परस्परम् अवलम्बनं च विमृश्य भगवता कृष्णेन उक्तं खलु ज्ञानं विज्ञानसहितम् इति ।

*****

## आधुनिकभारते शैक्षिकप्रविधेः आवश्यकता

**दिप्तीश कुमार शतपथी**
**शिक्षाशास्त्री (प्रथमवर्षम्)**
**अनुक्रमाङ्कः - ८३५**

साम्प्रतिके युगेऽस्मिन् विज्ञानस्य बहुलः व्यवहारः परिदृश्यते । सर्वे मानवाः अल्पीयसि काले अल्पेनैव श्रमेण पूर्वपेक्षया अधिकफलप्राप्त्यर्थं निरन्तरं प्रयत्नशीलाः भवन्ति । यतो हि मानवः स्वजीवनं सहजं कर्त्तुं विज्ञानस्य साहाय्येन विविधयन्त्रणां यथा - रेडियो-टेलिविजन-संगणकादीनां प्रयोगं करोति । मुख्यतः आधुनिकयुगेऽस्मिन् एतेषाम् अधिक्येन प्रयोगः सर्वे कुर्वन्ति एव । तथैव शिक्षाक्षेत्रे अपि आधुनिकोपकरणानां प्रयोगेण शिक्षणं सरलं वोधगम्यञ्च भवति । अतः आधुनिकयुगे यन्त्राणि येन प्रकारेण मानवानां हितं कुर्वन्ति तथैव शिक्षणे शिक्षणोपकरणानि छात्राणां अध्यापकानां च साहायं कुर्वन्ति । किञ्च एतेषां यन्त्राणां आर्विभावः विज्ञानाद् अभवत् । विज्ञानस्य नाम विशिष्टज्ञानम् । पुनः प्रविधेः आधारो भवति विज्ञानम् । दैनन्दिनजीवने क्रमबद्धरित्या वैज्ञानिकज्ञानकौशलानां प्रयोगः भवति प्रविधिः । पुनः एषः प्रविधिः यदा शिक्षाक्षेत्रे सम्बद्धः भवति तदा सः शैक्षिकप्रविधिः इति कथ्यते ।

शैक्षिकप्रविधौ छात्राः अध्यापकाश्च अल्पनैव कालेन वहूनि तथ्यानि संगृह्य शिक्षायाः प्रचारप्रसारं कुर्वन्ति । विशेषतया आकाशवाणी, ध्वनिपञ्जिका,प्रक्षेपिका,दूरदर्शनं,चलच्चित्रं इत्यादीनां शिल्पानां सहाय्येन शिक्षायाः मूल्यं अद्य वहुप्रसिद्धं समृद्धञ्च भवति । शैक्षिकप्रविधैः प्रयोगेण शिक्षायाः ज्ञानस्य प्रसारणं ज्ञानस्य संचयः विकासीकरणञ्च भवति । सम्प्रति जनानां विभिन्नशैक्षिकसमस्यासु क्रमवद्धतया प्रयोक्तुं शैक्षिकप्रविधिः काचित् प्रक्रिया इति वक्तुं शक्यते । मानवाधिगमस्य सम्पूर्णप्रक्रियायाः संशोधनार्थं एषः प्रयुज्यते एव । शैक्षिकप्रविधिः ज्ञानस्य तादृशी काचित् शाखा भवति या विभिन्नप्रविधीनां यान्त्रिकं प्राकृतिकं व्यवहारिकं विज्ञानञ्च प्रयुज्य

शैक्षिकप्रक्रियाः सद्दृढं कर्त्तुं प्रयतते । अस्य शैक्षिकप्रविधेः उपयोगः सर्वादौ 1926 तमे वर्षे सिडिनी एल. प्रेसि. महोदयः आमेरिकादेशे ओहियोविश्वविद्यालये शिक्षायन्त्राणां निर्माणैः एव कृतवानासीत् । अस्य शैक्षिकप्रविधेः आवश्यकता तदानीन्तनकालादारभ्य अद्यावधि वर्धमाना दृश्यते । विश्वे सर्वेऽपि देशाः अस्यावश्यकतां प्रयोगं च अङ्गीकुर्वन्ति एव । एषः प्रविधिः सर्वस्मिन् क्षेत्रे एव कार्यं कृत्वा विविधेषु क्षेत्रेषु यथा शिक्षकाणां क्षेत्रे, विद्यार्थिनां क्षेत्रे, समाजे, शिक्षकप्रशिक्षणक्षेत्रेषु च कार्यं कृत्वा सर्वेषां कल्याणं संसाधयति ।

**शिक्षकाय आवश्यकता**

शैक्षिकप्रविधौ प्रवीणः शिक्षकः छात्राणां व्यवहारान् ज्ञात्वा तेषां व्यवहारपरिवर्त्तनं कथं कुर्यात् इति जानाति । शैक्षिकप्रविधिः शिक्षकेभ्यः शिक्षणोपागमानां,शिक्षणव्यूहरचनानां, शिक्षणविधीनाञ्च विषये ज्ञानं प्रयच्छति ।

**छात्रेभ्यः आवश्यकता**

शैक्षिकप्रविधौ शिक्षकाः केवलं लाभान्विताः भवन्ति इति न, छात्रा अपि शिक्षणे अभिरूचिमुत्पादयितुं तथा अधिगमक्षमतायाः वर्धनार्थं शिक्षणं सरलं कर्त्तुं च अस्य प्रयोगं कुर्वन्ति एव ।

**समाजाय आवश्यकता**

एषः प्रविधिः केवलं विद्यालये एव साहाय्यं करोति इति न, अपि तु समाजे सर्वेषां जनानां कृते सहायको भवति । समाजे ज्ञानस्य संचये विकासे स्थानान्तरणे च सहायकः भवति अयम् । अस्य प्रविधेः सहाय्येन जनसञ्चारशिक्षायाः अपि प्रचारः प्रसारः विस्तारश्च भवति ।

**शिक्षकप्रशिक्षणाय आवश्यकता**

शिक्षकप्रशिक्षणस्य प्रमुखोद्देश्यं भवति प्रभावशाली शिक्षकाणां निर्माणम् । अस्य कृते शैक्षिकप्रविधिः अत्यन्तं सहायकः भवति । शिक्षणाभ्यासे वहुविधकौशलानां विकासः अनेन प्रविधिना एव कर्त्तुं शक्यते । अपि च सूक्ष्मशिक्षणं अनुरूपितशिक्षणं दलशिक्षणं अन्तःक्रियाविश्लेषणं अभिक्रमितानुदेशनं इत्यादिषु क्षेत्रेषु अयं प्रविधिः प्रशिक्षणक्षेत्रे अत्यन्तं सहायकः तथा च उपयोगी वर्त्तते ।

*****

## शिक्षायाः अन्तर्भूताङ्गानि

सन्जय कुमार साहु
नुक्रमाङ्कः ८३९
शिक्षाशास्त्रिप्रथमवर्षम्

**शिक्षा नम का ?**

शिक्षा इत्यत्र 'शिक्ष् विद्योपादाने' इत्यस्मात् धातोः 'अजाद्यतष्टाप्' इति सूत्रेण टापि कृते एवं 'गुरोश्च हलः' इति सूत्रेण अकारे कृते 'शिक्षा' इति शब्दः निष्पद्यते ।

**शिक्षायाः प्रकारत्रयम् भवति । तद् यथा –**

१. औपचारिकी शिक्षा ( formal education )
२. अनौपचारिकी शिक्षा ( non formal education )
३. निरौपचारिकी शिक्षा ( in formal education )

**अन्तर्भूताङ्गानि –**

१. शिक्षणम्
२. प्रशिक्षणम्
३. अनुदेशनम्
४. अधिगम वा शिक्षा

**शिक्षणस्य उद्देश्यम् –**

शिक्षणाधिगमप्रक्रिया,प्रक्रमोपेता क्रिया प्रक्रिया भवति ।

**प्रशिक्षणस्य उद्देश्यम् –**

शिक्षणकौशलानां प्राप्तिः. ।

**अनुदेशनस्य उद्देश्यम् –**

सूचनाप्राप्तिः । यथा – computer, news, etc......... |

**अधिगमस्य (शिक्षायाः) उद्देश्यम् –**

बालकस्य सर्वाङ्गीणविकासः ।

**बालकस्य सर्वाङ्गीणविकासः**

१. मानसिकविकासः ।
२. शारीरिकविकासः ।

३. आध्यात्मिकविकासः ।

४. तार्किकविकासः ।

५. वैज्ञानिकविकासः ।

६. सामाजिकविकासः ।

७. नैतिकविकासः ।

८. बौध्दिकविकासः

*******

# स्त्रीशिक्षायाः आवश्यकता

**नाम - अरुण गर्डिआ**

**शिक्षाशास्त्री प्रथम वर्षम्**

**अनुक्रमाङ्क - ८४०**

काले काले राष्ट्रस्य अभ्युदयाय स्त्रीणां भूमिका महती वर्तते । तत्रापि शिक्षा परमावश्यकी भवति । शिक्षया जनेषु आत्मविश्वासः समुत्पन्नः भवति । आत्मविश्वासेन साफल्यं लभ्यते । समाजे स्त्रियः क्षमतायाः प्रतिभायाः च प्रतिमूर्तिरुपाः । किन्तु व्यावहारिकजीवने स्त्रीणां अधिकाराः पुरुषवर्गसमं न सन्ति । सामान्यतः पुरुषः धनार्जनं कृत्वा परिवारस्य संरक्षणं करोति । शिक्षिताः स्त्रियः धनम् अर्जयित्वा आयव्ययस्य व्यवस्थाम् अपि कुर्वन्ति । परिवारस्य समस्तभारः स्त्रीणामुपरि भवति । पुरुषः केवलं धनार्जनं कृत्वा तदीयोत्तरदायित्वं निर्वहति । किन्तु स्त्री – पत्नी, माता, वधूः, भगिनी, पुत्री इत्यादिभिः रुपैः समाजे आत्मानं प्रतिष्ठापयति । अतः स्त्रीणां शिक्षाविषये अवश्यं सर्वैः अवधानं दातव्यम् , यतो हि शिक्षिताः स्त्रियः परिवारस्य अभ्युत्थानाय एव समर्थाः भवन्ति ।

सत्यार्थप्रकाशाख्ये ग्रन्थे स्त्रीशिक्षायाः आवश्यकताविषये दयानन्दः स्पष्टं चकार । समाजस्य हिताय यथा पुरुषाणां मध्ये शिक्षाप्रसारस्य आवश्यकता वर्तते , तथैव स्त्रीणामपि । यदि केवलं पुरुषा एव शिक्षिता भवेयुः स्त्रियश्च अशिक्षिताः तर्हि तयोः जीवनं सुखमयं न भवितुमर्हति, न च समाजस्य हितम् । अतो यथा वयं स्वपुत्राणां शिक्षायै प्रयत्नं कुर्मः तथैव पुत्रीणाम् अपि शिक्षायाः विषये अवधानं दद्याम । तदैव दम्पत्योः परिवारस्य समाजस्य च यथेष्टं हितं भविष्यति ।

स्वामिविवेकान्दमहोदयः स्त्रीशिक्षाविषये बहुश्रद्धां प्रकटितवान् । यथा उपनिषत्काले स्त्रीशिक्षायाः प्रचारः आसीत् , यथा प्राचीनकाले वैदिकसमये आमृणी , घोषा , अपाला , गार्गी इत्याद्याः ब्रह्मवादिविदुष्यः शिक्षां प्राप्तवत्यः, ततोऽपि अधिकतया आधुनिकभारते अपि स्त्रीशिक्षायाः प्रसारः प्रचारश्च अपेक्ष्यते इति विवेकः । ते "यत्र नार्यस्तु पूज्यन्ते

रमन्ते तत्र देवताः" इति मनुवचनं स्वीचक्रुः । ते उक्तवन्तः यत् भारतीयवनिता जननीस्वरुपा भवति । यदि सा अशिक्षिता भवति अर्थात् विद्यया वंचिता भवति तर्हि केवलं मनुष्याणां समुन्नतिः निष्फलैव 'इति अनेनैव हेतुना श्रीरामकृष्णपरमहंसैः स्वीकीया महाधर्मिणी देवी एव पूजिता । तद्यथा -

नृणां समुन्नतिकथा भविता वृथैव विद्यां विनैव जननी यदि साद्यशक्तः ।
इत्येव हेतुवशतः किल रामकृष्णैर्देवी कृता अथ महिमा सहधर्मिणी स्वा ।।

विवेकानन्दमहोदयाः अकथयन् - " यस्मिन् देशे नारीणां सम्मानं न भवति तस्मिन् देशे स्थितानां जनानां तस्य देशस्य च उन्नतिः कदापि न सम्भवति " इति । पुनः अवदन् यत् - ' यदि अस्माकं महिलागणः शिक्षितो न भवति तर्हि संसारस्य कल्याणम् असम्भवमेव । यदि स्त्रीपुरुषौ समानरथस्य द्वे चक्रे भवतः तर्हि एकं चक्रं भग्नावस्थायां विद्यते चेत् रथस्य पूरः सरणमविरुद्धं भवेत् इति विवेक । यत्र स्त्रियः उदासिनमनसा दुःखेन कालयापनं च कुर्वन्ति तत्रत्यपरिवारः देशस्य च उन्नति विषये कदापि आशा न कर्तव्या । तैरुक्तम् - " Of Course, they ( women ) have many and grave problems , but none that are not to be solved by that magic word ' Education the true education however is not yet conceived of amongst us " इति ।

सुशिक्षिता या स्त्री - शिक्षायाः प्रचारः करणीयः । ग्रामे नगरे च शिक्षाकेन्द्रम् उद्घाट्य प्रचारः करणीयः । एतादृश्या सच्चरित्रवत्या निष्ठावत्या उपदेशिकया स्त्रिया देशे स्त्रीशिक्षायाः प्रचारः यथार्थरुपेण भविष्यति इति । इतिहास - पुराणयोः , गृहव्यवस्था कलाकौशलयोः गृहस्थजीवनस्य कर्तव्यं तथा चरित्रगठनस्य सिद्धान्तानां विषये च शिक्षा दातव्या । एतेन सह शिशुपालनं जपपूजाध्यानादीनां शिक्षा दातव्या ।

*******

# शिक्षा

आदित्य एच्. जि.
शिक्षाशास्त्रिप्रथमवर्षम्

शिक्षा नाम जीवने शुभाशुभभावबोधिनी, पुण्यापुण्यविवेचनी, सदाचारस्य संचारयित्री च । एतया शिक्षयैव सुधियो विश्वहितं, देशसमाजहितं च चिकीर्षन्ति । सत्कर्म विधित्सन्ति, दुष्कर्म जिहीर्षन्ति, आत्मानं च मुमुक्षन्ते ।

**का नाम शिक्षा ?**

‘ शिक्ष ’ विद्योपादाने धातोः निष्पन्नः ‘ शिक्षा ’ इति शब्दः । शिक्षते अनया सा एव शिक्षा । अधिगमः ज्ञानप्राप्तिर्वा शिक्षेति । शिक्षा शब्दस्य कः सम्प्रत्ययः इति चेत् वक्तुं शक्यते यत् ल्याटिन् भाषायाः

'Educatum' इति शब्दात् निष्पन्नः 'Education' इति आङ्ग्लभाषायां शिक्षायाः अनुवादः । केचन मन्यते 'Educare' इति अथवा 'educere' इति शब्दाद्वा 'शिक्षा' शब्दस्योत्पत्तिः जाता ।

E+duco' E- अन्तःकरणं, duco = अग्रसारणम् । अतः अन्तःकरणे याः शक्तयः विराजन्ते तासां शक्तीनां विकासः एव शिक्षा इति ।

शिक्षायाः परिभाषाः –

- मानवान्तर्निहितपरिपूर्णतायाः अभिव्यक्तिरेव शिक्षा इति – Swami Vivekananda.
- स्वस्थे शरीरे स्वस्थमनसः निर्माणमेव शिक्षा इति –Aristotle.
- बालकस्य आन्तरिकविकास एव शिक्षा इति –Rousseau.
- परिपूर्णजीवनमेव शिक्षा –Harbert Spencer.
- मानवस्य देहात्ममनोभ्यः उत्तमोत्तमस्य सर्वतोमुखेन बहिरानयनमेव शिक्षा इति –Mahatma Gandhi.

**शिक्षायाः कार्याणि -**

शिक्षायाः अनेकानि कार्याणि सन्ति, तेषु चतुर्विधकारणानि प्रमुखरूपेण गण्यन्ते । तानि यथा-

- सामान्यकार्याणि – जन्मजातशक्तीनां विकासः, व्यक्तित्वस्य सर्वाङ्गीणविकासः, प्रौढजीवनस्य कृते तत्परता, संस्कृतिसभ्यतायाः संरक्षणं, चरित्रविकासश्च ।
- मानवीयकार्याणि-मूलप्रवृत्तीनां नियन्त्रणं परिशोधनं, वैयक्तिकावश्यकतायाः पूर्तिः, कालस्य सदुपयोगः, व्यावसायिककुशलतायाःविकासः, आध्यात्मिकविकासः ।
- राष्ट्रियकार्याणि–लोकतन्त्रात्मकविकासः, व्यक्तित्त्वस्य विकासः, कर्तव्यपालनभावनायाः विकासः, जीवनयापनविकासः, व्यावसायिककौशलस्याभिव्यक्तिः, नेतृत्वस्य कृते कौशलं, राष्ट्रियभावनायाः विकासः, राष्ट्रियैकतायाः भावनात्मकैकताया अभिवृद्धिः, अनुशासनस्य स्थापना चेति ।
- सामाजिककार्याणि– सामूहिकभावनायाः विकासः, सामाजिकपरम्पराणां परिपालनं, शाश्वतमूल्यानां संरक्षणं, नवीनविचाराणां स्वीकृतिः, नवीनपरिवर्तनस्य कृते नेतृत्वनिर्माणमिति ।

अस्माकं जन्मतः मृत्युपर्यन्तं शिक्षा विद्यार्जनं भवति । अतः शिक्षा (विद्या) कदापि न नश्यति । मनुष्यः मरणपर्यन्तं विद्यायाः अर्थी, शिक्षायाः अर्थी शिक्षार्थी भवति । यथा शिक्षार्जनं करोति तथा मानवस्य जीवनम् भवति । शिक्षायाः अर्थी सदैव मानवेषु पटुः भवति ।

अनेकयन्त्रतान्त्रिकमाध्यमेनापि शिक्षा प्राप्तुं शक्यते । यथा गणकयन्त्रादिद्वारा शिक्षार्जनं भविष्यति । यथा शिक्षां प्राप्नुमः तथैव समाजस्य निर्माणं भविष्यति । अतः शिक्षा सदैव पालनीया- "विद्या विनयेन शोभते" ।

**********

# अनुशासनम्(DISCIPLINE)

NAME-UDAYANATH PADHAN
CLASS-SHIKSHA SHASTRI 1ST YEAR
ROLL NO-848

अनुपूर्वात् शास् धातोर्ल्युटि अनुशासनम् इति पदं सिध्यति । शासनं विधिर्नियमो वा इति शासनशब्दस्यार्थः, यस्यार्थो वर्तते स्वेच्छापूर्वकं निमयानां नियन्त्रणानां वा स्वीकरणम् । यस्यापरं नाम वर्तते आत्मसंयम इति । जीवने तादृश्येवावश्यकता शरीररक्षायै भोजनस्य बौद्धिकविकसाय ज़ानाय च । सर्वेष्वेव स्थानेषु अनुशासनस्य पालनं परमावश्यकम् । अनेन विना जीवनमुन्नतं न भवति । अनुशासनस्य पालनेनैव मानवजीवने साफल्यमधिगच्छति , सुखप्राप्तिः दु:खनिवृत्तिश्च भवति ।

**अनुशासनस्यावधारणा** (THE CONCEPT OF DISCIPLINE)

आङ्गलभाषायामनुशसनस्य कृते DISCIPLINE इति शब्द: उपयुज्यते । "डिसिप्लिन्" (Discipline) शब्दस्य उत्पत्ति: लेटिनभाषाया: "Disciplinna" इति शब्दात् इति मन्यते, यस्यार्थ:-व्यवस्था, नियम:, शिक्षा, अभ्यास:, अध्यापनं शिक्षितावस्था चेति । Disciple इति आंगङ्लशब्दस्य उत्पत्ति: लेटिनभाषायाः "Discipulum" इति शब्दात् मन्यते, यस्य अर्थ: अस्ति शिष्य इति । शिष्येण इयमाशा क्रियते, यत् स: स्वगुरूणामादेशानां श्रद्धापूर्वकं पालनं कुर्यात् । तदनुसारेण च सफलजीवनस्य हेतो: स्वजीवने आवश्यकापेक्षितगुणानां विकास: क्रियते । एवं डीसिप्लिन शब्दस्य अर्थो भवति आचरणे नियमितताया: उत्पादनम् । डिसिप्लिन-शब्दस्य कृते संस्कृतभषायाम् अनेकेषां शब्दानां प्रयोग: दृश्यते, यथा "नियन्त्रणम्" "नियमनम्", संयम:, विनय:, अनुशासनमित्यादिः । "नियन्त्रणम्" इति शब्दस्य प्रयोग: तत्र भवति यत्र कोऽपि कमपि बलपूर्वकं वशे स्थापयति । यत्र कश्चन निर्धारितनियमानामनुसारेण कार्यं कर्तुं कथयति तत्र "नियन्त्रणम्" इति शब्दस्य प्रयोग: उचित: । यत्र स्वयमेव स्ववशे स्थापयेत्, तत्र संयम: इति शब्दस्योपयोगः भविष्यति । यत्र बालक: विनम्रतया श्रद्धया च सह ज्येष्ठानां गुरूणां च आदेशानां पालनं करोति, तत्र विनय: इति शब्दस्य प्रयोग: क्रियते । परन्तु अधिकतया "डिसिप्लिन्" शब्दस्य कृते "अनुशासनम्" इति शब्दस्य प्रयोग: प्रचलितो वर्तते ।

अनुशासनेन जीवनं संयमितं भवति । इन्द्रियणां मनोबुघ्यादीनां परिष्कारेण सह आत्मन: विकास: परिष्कार: च भवति । डीवीमहोदयस्य कथनं वर्तते –" सामाजिक-सहयोगभावनया परिणामोत्पादककार्याणां निर्वर्तनेन स्वप्रकारकं च अनुशासनं स्वत: उत्पद्यते ।"इदमेवात्मानुशासनं वर्तते , यत् समाजस्य स्वीकृतौ आधारितं वर्तते । एतादृशमनुशासनं नैतिकं चारित्रिकञ्च प्रशिक्षणम् अभिलक्ष्याग्रसरं भवति ।

Board of Education द्वारा उक्तमस्ति यत् अनुशासनम् तादृशमेकं साधनं वर्तते येन छात्राः व्यवस्थिता: सन्तः गुणानां स्वभावानां च प्रापका: भवेयुः ।(Discipline is the means where by children are trained in orderliness. Good conduct and the habit of getting the best out of themselves-Board of education)

**अनुशासनस्य महत्वम्** (Importance of Discipline)

सर्वस्मिन् जगति अनुशासनं दरीदृश्यते । प्रकृतिरपि अनुशासनबद्धा विलोक्यते । यथा-सूर्यो नियमत उदेति, नियमतश्चास्तमेति, ऋतवो नियमत परिवर्तन्ते सर्वाणि ग्रहनक्षत्राणि नियमत एव परिभ्रमन्ति । प्रकृतेरनुशासनपालनत्वात् सर्वत्र सामञ्जस्यं वर्तते । यदि मनुष्याः अपि अनुशासनबद्धा: स्युः,तर्हि शोभनं भवेत् । सर्वे मानवा: अनुशासननियमान् अवश्यमेव परिपालयेयुः । यतो हि मानवजीवने अनुशासनस्य खलु महती अपेक्षा वर्तते । यदि जना: स्वेच्छया यत्र यत्र यथा यथा वर्तेरन् तदा तु जगतो गतिः विचित्रैव स्यात् ,सर्वत्र कार्यहानिरेव न भवेत् । अत: जीवने अस्य जीवनसाफल्याय चानुशासनम् अनिवार्यम् । शैशवात् आरभ्य वार्धक्यं यावत् अनुशासनम् आवश्यकं वर्तते ।

*******

## <u>शिक्षायाः स्वरुपम्</u>

मधुमिता साहु
शिक्षाशास्त्री, प्रथमवर्षम्
अनुक्रमाङ्क - 849

सत्याचार-विचारशिक्षणपरा सार्वाङ्गिकीमुन्नतिं
छात्राणां विदधद्-विवेक-विनयाचार-प्रचारैकधीः ।
चारित्र्योन्नतिसाधिका गुणगणैः सारल्यसंसाधिका
लोकेषु प्रचरेत् सुशिष्यजनिदा शिक्षा सदा कामधुक् ।।

**<u>शिक्षायाः प्राचीनतमं रूपम्</u>** – शिक्षायाः प्राचीनतमं रूपम् अथर्ववेद प्राप्यते । तत्र शिक्षाया उद्देश्यं गुरुशिष्यसम्बन्धादिकं च विस्तरशो निरूप्यते । तत्र ज्ञान-सम्पन्नत्वस्य चिन्तनशक्तेश्च महत्त्वं प्रतिपाद्यते । ज्ञानेन सह संयमस्य धारणाशक्तेश्च महत्त्वं निर्दिश्यते । वेदानुकूलाचरणम् अनिवार्यत्वेनादिश्यते ।

पुनरेहि वाचस्पते देवेन मनसा सह ।(अथर्व.1.1.2)

वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम् ।(अथर्व.1.1.3)

श्रुतेन गमेमहि मा श्रुतेन विराधिषिः ।(अथर्व.1.1.4)

अथर्ववेदे छात्रस्य ब्रह्मचर्यपालनम् अनिवार्यत्वेनादिश्यते । आचार्यस्य दुर्धर्षत्वम्, संयमित्वम्, शीलवत्त्वम् च प्रशस्यते । तत्र समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुम् उपगच्छेदिति पद्धतिराश्रीयते ।

आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते ।(अथर्व.11.5.17)

आचार्योमृत्युर्वरुणः सोम ओषधयः पयः ।(अथर्व.11.5.14)

ब्रह्मचर्येति समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः ।(अथर्व.11.5.6)

गुरु-शिष्य-सम्बन्ध-विवेचनायां स्फुटमेतद् निर्दिश्यतेऽथर्ववेदे यद् आचार्योऽध्येतृषु मातृवत् पितृवच्च स्निह्यति व्यवहरति च । श्रमस्तपश्च छात्रस्य शस्त्रद्वयम् । तपःश्रमाभ्यां सर्वं लोकं स पुष्णाति ।

ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस्तपसा पिपर्ति । (अथर्व.11.5.4)

शिक्षायाः उद्देश्यं विविच्यते तर्हि वेदेषु शिक्षोद्देश्यरूपेण अध्यात्मज्ञानम्, आस्तिक्यम्, शारीरिक-वाचिक-मानसिक-हार्दिक-बौद्धिक-समुन्नतिः प्रतिपाद्यते । एवं सर्वविधसमुन्नत्याऽन्तेवासी सर्वदेवाधिवासः सम्पद्यते । छात्राणां शम-दमादि-गुणयुक्तं प्रतिपाद्यते । विद्यायाश्च श्रीवर्धकत्वं शिष्यते ।

दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वहा ।

यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा ।। (तैत्ति.1.4.2,3)

सत्य-तपो-दम-शमादिभिः सहैव स्वाध्यायः प्रवचनं च अनिवार्यत्वेन अनुशिष्यते । अत एव दीक्षान्तोपदेशे आचार्योऽन्तेवासिनम् अनुशास्ति – सत्यं वद । धर्मं चर ।

सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् ।

स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम् ।(तैत्ति.1.11.1)

वैशेषिकदर्शने "यतोऽभ्युदय-निःश्रेयस-सिद्धिः स धर्मः" इत्यनेन धर्मलक्षणेन सदैव शिक्षाया उद्देश्यम् अभ्युदयस्य निःश्रेयसस्य चावाप्तिर्निर्दिश्यते ।" विद्ययाऽमृतमश्नुते" "सा विद्या या विमुक्तये", "ऋते ज्ञानात् न मुक्तिः" इत्यादिभिः सुभाषितैः, सा शिक्षा या ब्रह्मगतिप्रदा इति शङ्कराचार्यवचनेन चाध्यात्मज्ञानावाप्तिर्मोक्षाधिगमश्च शिक्षाया लक्ष्यं निर्धार्यते ।

**शिक्षाविषये पाश्चात्यविदुषां मतम्** – सुकरात-महोदयस्याभिमतं यत् व्यक्तिगतभेद-वारणेन सार्वभौम-सत्यज्ञानं शिक्षाया उद्देश्यम् । सः शिक्षां व्यष्टेः समष्टेश्च समुन्नतिसाधनं मनुते । प्लेटो-महोदयः शिक्षायाः उद्देश्यरूपेण सच्चरित्रता-विनय-संस्कृति-सभ्यता-गुणग्राहिता-कलाप्रियत्वादि-गुणानां समन्वयं करोति । अरस्तू-महोदयः संस्तौति यत् सा शिक्षा साधीयसी

याऽध्यात्मदर्शनेन सममेव लोक-व्यवहार-दर्शनस्यापि सामञ्जस्यं साधयेत् । शिक्षा उदात्तभावोद्दीपनेन सहैव आत्मनश्च परिष्काराय स्यात् ।

शिक्षायाम् आदर्शवादस्य प्रवर्तकाः पाश्चात्त्यशिक्षाशास्त्रिणो वर्तन्ते – प्लेटो दकार्ते-बर्कले-फिरह्वे-हीगेल-काण्ट-प्रभृतयः । एते भौतिक-वादापेक्षयाऽध्यात्मप्रवणत्वम् अध्यात्मप्राधान्यं च शिक्षाया जीवनस्य च लक्ष्यं मन्यमानाः शिक्षाक्षेत्रे सादरं स्मर्यन्ते ।

वास्तविकं सुखं तु मानसिकमेव । विचारवादिनां मतं यद् आध्यात्मिकता विचारवादो वा वास्तविकं तथ्यम् । तत्रैव शाश्वत-सत्यादीनां समावेशः । तन्मतानुसारम् इयं विचारसृष्टिर्मानवस्य आध्यात्मिक-प्रकृतेरेवाभिव्यक्तिः । एतदेव भारतीयैः समर्थ्यते यत् – मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।

महात्मा बुद्धो धम्मपदे धर्मस्य विचारस्य चाधाररूपेण मनसो महत्त्वं प्रतिपादयति ।

मनोपुवंगमा धम्मा मनोसेट्ठा मनोमया ।
मनसा चे पदुट्ठेन भासति वा करोति वा ।
ततो नं दुक्खमन्वेति चक्कं व वहतो पदम् ।। इति ।।

******

# शैक्षिकसमाजशास्त्रम्

**नाम-जयदेव साहु**
**कक्षा-शिक्षाशास्त्रि प्रथम वर्षम्**
**अनुक्रमांक-८५०**

समाजशास्त्रं वैज्ञानिकस्य अध्ययनं करोति अर्थात् सामाजिकसम्बन्धानां समूहगत मानव व्यवहाराणाञ्च वैज्ञानिक अत्र क्रियते । “अगस्त काम्टे” महोदय अस्य शास्त्रस्य प्रवर्तकः वर्तन्ते । शैक्षिक समाज शास्त्रं एका शाखा वर्तते । शैक्षिक व्यवस्थायाः वैज्ञानिक विश्लेषणमेव शैक्षिक समाज शास्त्रं इति “ब्रुकोवर” महोदयेन उक्तम् ।

शैक्षिक समाज शास्त्रं अथवा शिक्षा समाज शास्त्रं शिक्षा समाजर्योमध्ये विद्यमानस्य सम्बन्धस्य अध्ययनं करोति । शैक्षिक समाज शास्त्रं सामाजिक सांस्कृतिक आर्थिक राजनैतिक साम्वधानिक परिवर्तनानां अध्ययनं करोति । विद्यालयः समाजस्य लघु स्वरुपं वर्तते इति एते कथ्यन्ते । समाजस्य विभिन्न धर्म जातीय वर्गीयः विद्यालये विना भेदं प्रवसन्ति पठन्ति च अतः विद्यालयी स्वव्यवस्थायाः तत्रत्यानां मानवीय भौतिक तत्वानां अध्ययनं शैक्षिक शास्त्रं विस्तरेण क्रियते ।

**सामाजिकीकरणम्**

वालकः जननावसरे एकाकी एव भवति । ततः सः परिवारेण समुदायेन सम्पृक्तः सन् परिवारस्य समुहस्य च रीति नीति नियमान अधिगच्छति । समुदाये विद्यालये वा स्थिते वालो सहयोगः सहवासः परोपकारः इत्यादयः सामाजिकः गुणः क्रमशः विकसन्ति । किञ्च वालः समुदायानुरुपमेव व्यवहरति कार्याणि करोति च इयमेव प्रक्रिया सामाजिकीकारण प्रक्रिया इति उच्यते । वालकस्य सामाजिकी करणे शिक्षायाः प्रधानं पात्रं वर्तन्तेव । वालकस्या सामाजिकी करणभावे सह स्वार्थे परायण सन् पशुवद् व्यवहृते । किञ्च मूल प्रवृत्यानुगुणं चेष्टे तत् सामाजिकी करणेन वालके वास्तविकतायाः परिज्ञानं सम्भवति । सः समाजस्य निर्दिष्टां निर्दुष्टां भाषा अधिगच्छति समाजोपयोगिनी कानि कार्याणी इति वेत्ति । सामाजिक प्रतिष्ठायाः महत्वं वहति आत्मोन्नति च विन्दति ।

**सामाजिकीकरणस्य श्रोतांसि**

1. परिवारः
2. सतीर्थयः
3. पारिपार्स्विकः
4. पाठशालाः –विद्यालयः –शैक्षिक संस्था
5. धार्मिक संस्था
6. जन संचार साधनानि यथा-
    - दुरदर्शनं
    - भक्ति
    - चलचित्रम्
    - पत्र पत्रिका

कूलक्रमगता परम्परा इत्यादिनी ।

**सामाजिकीकरणस्य स्रोतांसि**

सामाजिक संघटनेषु व्यवस्थाषु च जायमानं परिवर्तनमेव सामाजिक परिवर्तनम् इति कथ्यते । संस्कृतौ सामाजिक संघटने च परिदृस्यमानं परिवर्तनमेव सामाजिकी परिवर्तन इति ।

*****

# मदनमोहनमालवीयस्य शिक्षादर्शनम्

**विपिन कुमार डिमरी**
**अनुक्रमांक-०१**
**शिक्षाशास्त्रिद्वितीयवर्षम्**

भारतवर्षे अनेके महापुरुषाः, वीराः ऋषयः, सन्यासिनः विद्वांसश्चाभवन् । तेश्वन्यतमो मदनमोहनमालवीयः भारतपुण्यधरायामस्यां जन्म अलभत । ये बाल्यावस्थायामेव एतद् ज्ञातवन्तो यत्समाजस्य परतन्त्रभारतस्य च दशा चिन्तनीया वर्तते इति । सः एतत् विज्ञाय चिन्ताकुला आसन् यद् हिन्दुच्छात्राः स्वकीयं कर्तव्यं धर्मञ्च प्रति अतीवोदासीनाः वर्तन्ते । तेषां चरित्रं नैतिकता चेत्यपि सुदृढा नासीत् । राष्ट्रियतायां देशभक्तौ च तेषामास्था नास्ति । पाश्चात्यसभ्यतायाः संस्कृत्याश्च तेऽविलम्बं प्रभाविताः जायन्ते । आङ्ग्लभाषां प्रति तेषां मोहो वर्तते ।

समाजे व्याप्तानाम् एतादृशानामभावानां पूर्तय एव मालवीयमहाभागैः बनारसहिन्दुविश्वविद्यालयस्य सङ्कल्पे प्रतिबिम्बितो भाति । विश्वविद्यालयोऽयं मालवीयमहोदयानां शैक्षणिकविचारस्य मूर्तिमान् प्रतीको वर्तते ।

**शिक्षायाः लक्ष्यम् –**

शिक्षाया आदर्शकल्पनाया आधारितास्तेषां विचारा आसन् यद्देशे सुपुत्राः भवेयुरिति । यतः भारतमातुः हिन्दूसमाजस्य च कल्याणं स्यात् । शिक्षया बालानां मनो देशसेवायां भवेत् । मालवीयमहोदयः शिक्षायाः उपलब्धानां साधनानां पूर्णमुपयोगं स्यादिति सन्दर्भे बहुयत्नं अकरोत् ।

**राष्ट्रिया शिक्षा –**

मलवीयमहोदयस्य मतमासीत् यत् शिक्षा राष्ट्रियतायाः पोषिका स्यात् । तेषामनुसारम् । - या शिक्षापद्धतिः देशस्यान्तर्भागतः स्वाभाविकरूपेणोत्पन्न भवति , सा स्वकीयायाः राष्ट्रियपरिस्थितेः , समस्यानाम्, आवश्यकतानां आदर्शानां सांस्कृतिकानाञ्च प्रवृत्तीनाम् अनुरूपं विकसिता भवाति , सैव भवति राष्ट्रिया शिक्षेति ।

**नैतिकी शिक्षा –**

नैतिकता मानवस्याऽधारस्तम्भो भवति । नैतिकतायाः अभावे कोऽपि जनः , समाजः राष्ट्रो वा पतनोन्मुखी भवति । अत एव कस्यामपि परिस्थितौ नैतिकता नैव परित्याज्या । एतस्मादेवकारणाद् विद्यार्थिनां कृते नैतिकशिक्षायाः विधानं शिक्षासंस्थासु नूनमेव भवेत् । तेषां मते विद्यातपोभ्यां विरहितो जनः कालान्तरे दुराचारी जायते इति ।

**शिक्षकः –**

मालवीयमहोदयानां मते शिक्षकस्य चरित्रं अग्निरिव प्रकाशमानं भवेद् । शिक्षकस्य वैयक्तिकजीवनं विना शिक्षा न सम्भवति । अतः शिक्षकः उच्चादर्शयुक्तः ज्ञानप्रदानाय च सदैवोद्यतो भवति । तेषां मते शिक्षणं न सामान्यकर्म । '**अध्यापनं तु पवित्रं कर्म**' इत्येते मन्वते स्म ।

**शिक्षायाः माध्यमः –**

मातृभाषा हि दैनिके व्यवहारे प्रयुज्यमाना भाषा भवति । बालानां कृते मातृभाषा सरलतमा भवति । एतस्यामभिव्यक्तौ बालके स्वाभाविकाऽऽनन्दोपलाब्धिर्भवति । शिक्षायाः माध्यमो मातृभाषा स्यादिति मालवीयमहाभागाः वाञ्छन्ति स्म ।

**स्त्री शिक्षा –**

खीष्टस्य १९०७ तमेऽब्दे 'स्त्रीशिक्षा' इति विषयकं लेखं सम्प्रकाश्य मालवीयमहाभागैरिदं प्रतिपादितं यत् स्त्रीशिक्षामन्तरा भारतस्योन्नतिर्नास्ति । तेषां मते मानवसमाजस्य कल्याणमकल्याणं वा स्त्रीणामेव हस्तेषु वर्तते । तदानीन्तने युगे स्त्रीणां दुर्व्यवस्थायाः परिष्काराय मालवीयमहोदयाः आजीवनं यत्नशीलाः आसन् । तैः प्राचीनकाले स्त्रीणां शिक्षायाः उन्नतदशाभिः प्राचीनविदुषीभिश्च प्रेरणाग्रहणमपि प्रस्तावितम् । मालवीयमहोदयाः छात्रैः सहशिक्षायाः प्रबलाः पक्षधरा आसन् ।

एतादृश्या शिक्षया भारतस्योद्धारं वाञ्छति स्म महामना मालवीयः । एतेषां जीवनं पुरातनयुगीनानाम् ऋषीणां जीवनं स्मारयति । सदाचारः , देशभक्तिः - राष्ट्रियता चेति तेषां जीवनादर्शः आसीत् । एतदेव लक्ष्यं तैः शिक्षायाः कृतेऽपि निर्धारितम् । मालवीयमहोदयः यशो नेच्छति स्म परं यशस्तु तेषां कर्त्तव्यपरायणतां वीक्ष्यानुगच्छति स्म ।

*****

# विद्या ददाति विनयम्

शेष कलेट्

शिक्षाशास्त्री द्वितीयवर्षम्

एकस्मिन् नीतिश्लोके स्पष्टभावेन उल्लेखोऽस्ति - विद्या ददाति विनयम् । विद्या विनयस्य मूलभूमिः इति श्लोकः इत्थमस्ति -

विद्या ददाति विनयं विनयात् याति पात्रताम् ।
पात्रत्वाद्धनमप्नोति धनात् धर्मस्ततः सुखम् ।।

विद्याया विनयं प्रभवति । विनयी सत्पात्रः भवति । समाजे तस्य स्थिति दृढः जायते । अपि च क्रमशः सः धनार्जनं करोति । धनव्ययेन सः लोकहितकरं कार्यं कर्तुं समर्थः भवति । फलतः धनं उपार्जयति । धर्मार्जनफलेन सकलसुखस्य अधिकारी भवितुं असौ योग्यः भवति । सः धर्मी इत्यतः सत्यं वदति । तस्य चरित्रं निर्मलं याति । यथा -

नभोभूषा पूषा कमलवनभूषा मधुकरः
वचोभूषा सत्यं वरविभवभूषा वितरणम् ।
मनो भूषा मैत्री विमलकुलभूषा सूचरितम्
सभाभूषा सूक्तिः सकलगुणभूषा च विनयम् ।।

सूर्यः आकाशस्य भूषणम् । भ्रमरः पद्मवनानां भूषणम् । सत्यमेव वचो भूषणम् । दानं श्रीमतः भूषणम् । बन्धुता मनसः भूषणम् । सुचरितमेव विमलकुलभूषणम् । सूक्तिः सभायाः भूषणम् । परन्तु विनयः एतेषां सर्वेषां गुणानां भूषणम् । विनयस्य महत्ववर्णनेन भाषायाः लक्ष्यं वर्तते । विनयः सर्वश्रेष्ठ इति सदा प्रतिपाद्यते । यथा जीवनं विना शरीरं, जलं विना नदीकूपतड़गादयः, रसं विना कविता, पतिं विना वनिता, वृक्षं विना लता, तेजो विना सविता, चन्द्रं विना कुमुदं, हास्यं विना ललना न शोभते, तथैव विनयं विना शौर्यं, वीर्यं, धैर्यं, पराक्रमोऽपि न शोभते । तस्मादेव विनयं महत्भूषणम् । विनयेन पुत्रः सुपुत्रः भवति । तस्य सुचरितेन वंशः पवित्रो जायते । अतः उच्यते -

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ।।

यथा श्रुतेन श्रोत्रं, दानेन पाणिः, सत्येन धर्मः, शशिना निशा, पयसा पद्मम्, कमलेन पयः शोभते तथा विनयेन जनाः शोभन्ते । यथा विनीतजनः विद्यां लभते, तथा विद्ययापि विनयो लभ्यते । अतः वेदे वर्तते -

**विद्याद्वै ब्राह्मणमाजगाम गोपाय मा वेधिष्टेऽहमस्मि ।**
**असूयजायान्तयवेऽयताय न सान्नुया वीर्यवती तथा स्याम ।।**

मन्त्रेऽस्मिन् विद्यापात्रं ऋजुरेव जनः भक्तः अनुकथ्यते, विनयी छात्रः एव विद्यधिकारी भवति । अथ च अविनयशीलाय विद्यादानं महान् दोषः । श्रुत्या यथार्थतः तदुक्तम् -

यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्यपालनम् ।
यस्य न द्रुह्यात् कतनाच्चनाह तस्मै मान्नुयानिधिपाय ब्रह्मन् ।।

विनयविहीनः जनः विद्यया विनापि संसारे अनादरं लभते । दुर्योधनः विनयहीनः आसीत् । सः परन्तु आसीत् अनुनयी, अभिमानी च । अतः तस्मिन् न कोऽपि स्निह्यति स्म । परिशेषे सः अकालमृत्युना कवलितः ।

रावणः आसीत् अतिविद्वान् । रामचन्द्राय विद्यादानं कर्तुं तस्य क्षमता चासीत् । परं मन्दवुद्धिवशात् अविनयत्वात् अतिदर्पाद् वा सः रामेण हतः । एवं विनयस्य परिणाममवलोक्य पण्डिताः कथनमुखराः भवन्ति । यतः प्रभुपेयसि आम्लस्य लवणमात्रमपि, तावन्ति दुग्धानि दधित्वेन परिणमन्ते । तथा विनयेन धर्माः प्रवर्धन्ते । प्रीतिः, शान्तिः, विनयेन समुत्पद्यते । यथा सत्यमुक्तम् –

गौरवं पुरूषस्नेहं नीचेषु प्रेम वन्धुषु ।
दर्शयन् विनयो धर्मः सर्वप्रीतिकरो भवेत् ।।

अविनयशीलानां मुखदर्शनं कर्तुं न कोऽपि अग्रेसरः भवति । अविनयिनः मुखं त्वतिभयङ्करम् । मनसि अहमिकाम् उत्पादयति , ईर्ष्यां समुत्पादयति, सरलसुखमार्गं कण्टकितं करोति । परन्तु विनयः शत्रुं मित्ररूपेण परिणमयति, दुर्गमानपि कुसुममिव कोमलान् करोति । अतः अमूल्यं विनयं विद्या एव जनयति । अतः कालिदासेन यथार्थे तदीयरघुवंशे कथितम् -

प्रजानां विनयाधानात् रक्षणात् भरणादपि ।
स पिता पितरस्तासां केवलं जन्मवेतवः ।।

रघुवंशप्रदीपो राजा दिलीपः प्रजनां विनयस्य शिक्षायाः च आधानात् पिता आसीत् । यतः विद्यायाः परिणामः विनयः । पुनः यथार्थतः उच्यते -

विद्या विनयोपेता हरति न चेतांसि कस्य मनुजस्य ।
काञ्चनमणिसंयोगा नो जनयति कस्य लोचनानन्दम् ।।

कोऽपि शास्त्रज्ञः यदि विनयहीनो भवति, सः मूर्खः इति कथ्यते । अतः विनयः नरस्य भूषणम् । तद् भूषणं विद्याया सुलभं जायते । यतः "**विद्या ददाति विनयम्**" ।

******

## आदर्श शिक्षकः

सागरिका पट्टनायक
शि.शा. द्वितीयवर्षम्
अनुक्रमाङ्कः- ८

**“क्षणे क्षणे यन्नवतामुपैति तदेव रूपं खलु शिक्षकस्य”**

निखिलभुवने न कोऽपि नरः विद्यते, यः गुरुं न नमति । संसारेऽस्मिन् विद्यमानः “**गुरूः**” इति शब्दः अत्यन्तं दुर्लभः । यद्यपि गुरू इति अतिलघुकायशब्दः तथापि सः महान् तात्पर्यमावहति । अधुनातनसमाजे

"**गुरूः**" शिक्षकः, अध्यापकः, आचार्यः इति नामभिः अभिधीयते । येषां पार्श्वे विद्यायाः वारिधिः पुष्पसदृशं शोभते तां विद्यामुपार्जयितुं छात्रः तृषार्तवत् शिक्षकस्य शरणं गच्छति । शरणागतस्सन् छात्रः सर्वदा शिक्षकस्य सुव्यवहारं सुसम्बन्धस्थापनं मधुरवाचनं च पश्यति । एतादृशं व्यवहारं दृष्ट्वा छात्रः तं शिक्षकम् आदर्शशिक्षकरूपेण आमनति । अतः कालिदासेनोक्तं यत्-

श्लिष्टा क्रिया कस्यचिदात्मसंस्था,
संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां,
धुरि प्रतिष्ठापयितव्य एव ॥

अतः छात्रस्य मनसि सैव आदर्शशिक्षकः यः स्वमधुरवचनैः उपदिशति, स्नेहेन पाठयति, उदाहरणैः बोधयति, छात्रेभ्यो न क्रुध्यति, प्रियभाषी भवति, छात्रवत्सलः भवति, छात्रैः साकं मित्रवत् आचरति, कृतदोषं इतरच्छात्रं दण्डं विना बोधयति च । तस्मात् एतादृशः गुणग्राहिशिक्षकः निस्सन्देहेन अध्यापकः श्रेष्ठः, सर्वगुणसम्पन्नश्च भवति । अतः छात्राः एतादृशाध्यापकान् स्वादर्शशिक्षकत्वेन स्वीकुर्वन्ति ।

******

# अभिप्रेरणा शिक्षा च
# (MOTIVATION & EDUCATION )

**तोता रामः**

**अनुक्रमाङ्कः -१३**

वयं प्रतिदिनं बहूनि कार्याणि कुर्मः । एतानि कार्याणि वयं किमर्थं कुर्मः ? जगति मन्यते यत् एतेषां कार्याणां पृष्ठे कापि अभिप्रेरणा भवतीति । इतः परम् अस्माकं मनसि प्रश्नः समायाति यत् का नाम अभिप्रेरणा इति । सामान्यार्थे उत्तेजना उद्दीपनं वा (stimulus ) अभिप्रेरणा भवति । अस्याः स्वरुपम् आन्तरिकं बाह्यञ्च भवति । परन्तु मनोविज्ञानानुसारं अभिप्रेरणा एका आन्तरिकी सोद्देश्या प्रक्रिया वर्तते । विभिन्नमनोवैज्ञानिकैः अभिप्रेरणायाः विभिन्नपरिभाषाः प्रस्तुताः । विद्यमानानां तासां परिभाषाणामाधारेण अभिप्रेरणायाः स्वरूपमत्र प्रस्तूयते –

(१) अभिप्रेरणा एका आन्तरिकी प्रक्रिया अवस्था वा वर्तते । एतस्याः अवस्थायाः स्वरूपम् अमूर्तं वर्तते न तु मूर्तम् ।

(२) अनयाऽवस्थया काश्चन क्रियाः उत्पन्नाः भवन्ति ।

(३) तासां क्रियाणां निश्चितं लक्ष्यं भवति।

(४) लक्ष्यप्राप्तिपर्यन्तम् इमाः क्रियाः प्रचलन्ति।

अभिप्रेरणायाः स्वरूपं स्पष्टयन् गिल्फोर्डमहोदयो वक्ति यत् – "A motive is any particular internal factor or condition that tends to initiate and to sustain activity".

गिल्फोर्डमहोदयस्य इयं परिभाषाऽपि अभिप्रेरणायाः उपर्युक्तस्वरूपस्य समर्थनं करोति। अभिप्रेरणाप्रक्रियायाः त्रीणि तत्त्वानि वर्तन्ते – आवश्यकता, प्रणोदः, प्रोत्साहनञ्च। न्यूनतायाः आधिक्यस्य च शारीरिकाऽवस्थायाः नाम आवश्यकता अस्ति। इयं द्विधा भवति – जैविका निष्काषनीया च। यदा शरीरस्य उत्तक- कोशिकासु कस्यापि तत्त्वस्य न्यूनता भवति।

न्यूनतायाः फलस्वरूपेण या आवश्यकता उत्पन्ना भवति सा जैविकावश्यकता भवति। यथा –बुभुक्षा पिपासा च।

शरीरे तत्त्वानां पदार्थानां वा आधिक्येन या आवश्यकता उत्पन्ना भवति तस्याः नाम निष्कासनीयाऽवश्यकता वर्तते। यथा - मलं मूत्रञ्च।

आवश्यकतया उत्पन्ना क्रियाशीलता प्रणोदनं भवति। यथा - बुभुक्षायै भोजनान्वेषणम्। यत्प्राप्त्यर्थं जीवः उद्युक्तो भवति अर्थात् यत् वस्तु जीवमाकर्षयति तल्लक्ष्यमिति। यथा – भोजनम्।

आवश्यकता – प्रणोदनं – लक्ष्यम् (प्रोत्साहनम्)

**अभिप्रेरकाणां प्रकाराः –**

मैस्लोमहोदयानुसारम् अभिप्रेरकाः वर्गद्वये विभक्ताः –

(१) जन्मजात – अभिप्रेरकाः (Innate motives) –ये उत्प्रेरकाः जन्मना एव शरीरे भवन्ति, ते जन्मजात -उत्प्रेरकाः इति नाम्ना ज्ञायन्ते। जन्मजात – अभिप्रेरकाणाम् अन्तर्गते बुभुक्षा, पिपासा, निद्रा, मलमूत्रविसर्जनञ्च इत्यादयः अभिप्रेरकाः आगच्छन्ति।

(२) अर्जिताभिप्रेरकाः (Acquired) - एते उत्प्रेरकाः जन्मना जीवस्य शरीरे न भवन्ति परन्तु तेषाम् अर्जनं जीवः समाजे करोति। रुचिः, सामुदायिकता, उपलब्धिः प्रमुखाः अर्जिताभिप्रेरकाः वर्तन्ते।

**शिक्षायां शिक्षणे च अभिप्रेरणायाः स्थानम् –**

शिक्षायाः उद्देश्यं योग्यच्छात्रस्य निर्माणमस्ति। इदं कार्यम् अभिप्रेरणया विना कदापि नैव भवितुं शक्नोति, यतः अभिप्रेरितच्छात्रः स्वशक्तीनां क्षमतानाञ्च प्रयोगम् उचितदिशायां करोति। तस्य सङ्कल्पशक्तिरिति दृढीभवति। विद्यालयः शिक्षायाः एकम् औपचारिकमभिकरणमस्ति। विद्यालये

कक्षाशिक्षणे च उचितशिक्षणप्रविधिना सह अभिप्रेरणायाः सहयोगः अत्यन्तावश्यकः वर्तते । अभिप्रेरणायाः अभावे उचितशिक्षणविधीनां प्रभावोऽपि न जायते ।

अत एव शिक्षणे शिक्षकः उचित – अभिप्रेरकाणां प्रयोगं कृत्वा प्रभावशालिशिक्षणं कर्तुं शक्नोति ।

**अभिप्रेरणायाः शैक्षिकमहत्त्वम् –**

अभिप्रेरणायाः शैक्षिकमहत्त्वम् निम्नलिखितमस्ति –

**बालानां व्यवहारेषु परिवर्तनम् –**

शिक्षकः प्रशंसा, पुरस्कारः , निन्दा , भर्त्सना इत्यादि कृत्रिमोद्दीपकानां माध्यमेन बालानां व्यवहारेषु परिवर्तनं कर्तुं शक्नोति ।

**चरित्रनिर्माणे सहायता -**

शिक्षकः बालकानाम् उत्तमगुणानाम् आदर्शानाञ्च प्राप्त्यर्थं प्रेरयितुं शक्नोति । येन शिक्षकः तेषां चरित्रनिर्माणे साहाय्यं करोति ।

**अवधानस्य केन्द्रीकरणे सहायता –**

शिक्षकः उत्तमप्रेरकाणां प्रयोगेण पाठ्यपुस्तके अवधानस्य केन्द्रीकरणार्थं प्रेरयितुं शक्नोति ।

**मानसिकविकासः –**

क्रो एण्ड क्रो युगलदम्पत्यानुसारं प्रेरकाः अधिगमप्रक्रियां प्रोत्साहयन्ति । अतः शिक्षकः उत्तमप्रेरकाणां प्रयोगेण छात्रान् ज्ञानार्जनार्थं प्रोत्साहयति ।

**रुचेः विकासः –**

प्रेरणा छात्रेषु रुच्युत्पादनस्य कला वर्तते । अत एव शिक्षकः प्रेरयित्वा तेषु रुच्युत्पादनं कर्तुं शक्नोति ।

**अनुशासनभावनायाः विकासः –**

शिक्षाग्रहणार्थम् अनुशासनं आवश्यकं भवति । उत्तमोत्तमकार्यार्थं शिक्षकः छात्रान् प्रेरयित्वा तेषु अनुशासनभावनायाः विकासं कर्तुं शक्नोति ।

**सामाजिकगुणानां विकासः –**

मनुष्यः सामाजिकप्राणी वर्तते । शिक्षया शिशुः सामाजिकः भवति । अत एव शिक्षकः छात्रान् सामाजिककार्येषु भागग्रहणार्थं संप्रेर्य तेषु सामाजिकगुणानां विकासं कर्तुं शक्नोति ।

**प्रतियोगिता भावनायाः विकासः –**

शिक्षकः छात्रान् प्रेरयित्वा तेषु प्रतियोगिताभावनायाः विकासं कर्तुं शक्नोति ।

अन्ते कथयितुं शक्यते यत् शिक्षायां शिक्षणे च अभिप्रेरणायाः महत्त्वपूर्णं स्थानं वर्तते इति। वस्तुत अभिप्रेरणा शिक्षणे केन्द्रभूतं तत्त्वं वर्तते। अभिप्रेरणया विना व्यक्तिः कस्मिन्नपि कार्ये सफलतां प्राप्तुं न शक्नोति।

******

# वैदिकशिक्षायाः महत्वम्

जयश्री बारिक
शि.शा.द्वितीयवर्षम्
अनुक्रमाङ्कः -14

मन्त्रब्रह्मणात्मकः शब्दराशिः वेदः। वेद इति शब्दः विद् ज्ञाने धातोः घञ्-प्रत्ययेन निष्पन्नः यस्यार्थः ज्ञानमित्युच्यते। विद्यन्ते ज्ञायन्ते लभन्ते एभिर्धर्मादिपुरुषार्था इति वेदाः। आंग्लभाषायां विद् इत्यस्य to know इत्यर्थः ग्राह्यः। इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं वेदयति सः वेदः इति। सायणाचार्येण वेद शब्दस्य व्याख्या कृता वर्तते। अलौकिकं अपौरूषेयत्वं नित्यत्वं पुरूषार्थोपायश्चेति वेदशब्दस्यार्थः। पुनः प्रसङ्गेस्मिन् सायणाचार्यः कथयति-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते। एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥

परमेश्वरस्य निश्वासात् सृष्टेः आदौ वेदाः प्रकटिताः श्रुतिः ब्रवीति। तद्यथा-

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥

वेदाः ज्ञानस्य भण्डाररूपेण विराजन्ते। महर्षिमनुना वेदविषये प्रोक्तम्-

चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्। भूतं भव्यं भविष्यच्च सर्वं वेदात्प्रसिद्ध्यति॥

चत्वारः वर्णाः, त्रयः लोकाः, चत्वारः आश्रमाः, त्रयः कालाश्च वेदेषु समुपलभ्यन्ते। सर्वासां विद्यानां सर्वेषां शास्त्राणाञ्च मूलत्वेन वेदाः प्रतिष्ठिताः जायन्ते इति स्मृतिकारेण याज्ञवल्क्येन प्रोक्तम्-

न वेदशास्त्रादन्यत्तु किञ्चिच्छास्त्रं तु विद्यते। निसृतं सर्वशास्त्रं तु वेदशास्त्रात्सनातनात्॥

धर्ममूला हि वेदाः। धर्मार्थकाममोक्षाख्यपुरूषार्थचतुष्टयेषु मोक्षस्य प्राधान्यं वर्तते। धर्मं विहाय मोक्षप्राप्तिः नैव भवितुमर्हति।

अस्माकं भारतीयसंस्कृतिः सर्वप्राचीनास्ति। चत्वारः वेदाः वर्तन्ते। ऋक्, यजुः, साम, अथर्वः इति वर्तन्ते। भारतीयसंस्कृतेः वेदाः प्राणस्वरूपाः सन्ति। भारतीयसंस्कृतेः आद्यः वेदः भवति।

ऋग्वेदे उल्लिखितं अस्ति यत्- सा प्रथमा संस्कृतिविश्विवारा इति । (6 141)
सैव संस्कृतिः वैदिक संसकृतिरित्यभिधीयते । यदा समस्तं जगत् अज्ञानान्धकारे निमज्जितमाऽसीत् तदा इयं संस्कृतिः ज्ञानरूपेण उद्भासिता आसीत् । अतः शिक्षायां वेदस्य महत्वम् आवश्यकता च वर्तते ।
भारतीय समाजस्य परिकल्पना वेदं विहाय कर्तुं नैव शक्यते ।

*******

# शिक्षाक्षेत्रे वर्तमानावश्यकता

यज्ञदत्त स्वाईं
शि.शा.द्वितीयवर्षम्
अनुक्रमाङ्कः -14

मानवः एकः सामाजिकप्राणी अस्ति । सः किमपि कार्यं करोति । परन्तु आवश्यकतायाः पूर्तिः कदापि न भवति । सः प्रतिदिनं नूतनवस्तुनः विषये चिन्तनं करोति । परन्तु अस्माकं देशः एकः विशालदेशः वर्तते चेत् अत्र आवश्यकतायाः अपेक्षा वस्तुनः न्यूनता जायते । अस्माकं छात्राणां कृते एकम् अपेक्षाकृत पुस्तकम् अपि अस्मिन् देशे नाऽस्ति । अस्माभिः एतादृशानां पुस्तकानां प्रकाशनं कर्तव्यं, येषु अत्यन्तसरलायां प्रसन्नभाषायां च रामायणस्य महाभारतस्य उपनिषदां च कथानां सङ्ग्रहः इत्यादि भवेत् । इमानि पुस्तकानि बालकानां कृते पठनार्थं देयानि । अद्य आवश्यकता अस्ति विदेशनियन्त्रणं दूरीकृत्य अस्माकं विविधशास्त्राणां विद्यानां च अध्ययनं भवेत् इति । तथा युगपदेव आङ्ग्लभाषायाः पाश्चात्यविज्ञानस्य च शिक्षणं भवेत् ।

अस्माकम् उद्योगक्षेत्रे उन्नत्यर्थम् अभियान्त्रिक्याः शिक्षायाः अपि आवश्यकता भवेत्, येन देशस्य युवकाः सेवावकाशानाम् अन्वेषणस्य स्थाने स्वजीविकार्थं समुचितं धनोपार्जनम् अपि कर्त्तुं प्रभवेयुः, तथा दुर्दिनानां कृते किञ्चित् धनम् अपि सुरक्षितं स्थापयेयुः । सर्वप्रथमम् अस्माभिः स्वदेशस्य आध्यात्मिकशिक्षायाः लौकिकशिक्षायाश्च प्राबल्यं सम्पादनीयम् । एतदर्थं भवद्भिः स्वप्नाः द्रष्टव्याः, परस्परं वार्तालापः करणीयः, चिन्तनं करणीयं तथा अपेक्षितकार्याणि करणीयानि । यावत्पर्यन्तं वयम् इमानि कर्माणि न पूरयामः, तावत् पर्यन्तम् अस्माकं देशस्य उद्धारः नैव सम्भवति । अस्माकं मनसि एतादृशी महाकाङ्क्षा भवेत् यत् वयम् एतादृशं किमपि सेवासंस्थानं प्रारभेमहि, येन उन्नताः श्रेष्ठाश्च विचाराः सर्वेषां द्वारपर्यन्तं प्रपिताः भवेयुः । तदनन्तरं कोऽपि पुरुषः महिला वा स्वस्य भाग्यस्य निर्माणं स्वयं कुर्यात् । किञ्च अनेन प्रकारेण सम्पूर्णे भारतराष्ट्रे एतत् कार्यं व्याप्तं भवेत् । वयं कदाचित् एषा अत्यन्तभारभूता प्रतीयेत, परन्तु अस्याः सुमहती आवश्यकता वर्तते ।

*******

# वैदिकशिक्षा

रेखारानी पात्र
शि.शा.द्वितीयवर्षम्
अनुक्रमाङ्कः- 16

वैदिकशिक्षाप्रणाली विश्वस्य आद्यप्रणाली इति कीर्त्त्यते । इयं शिक्षाप्रणाली कुत्र प्रादुरभूत् इत्यत्र विद्वत्सु ऐकमत्यं नास्ति । परन्तु वैदिकशिक्षाप्रणाली न केवलं भारतस्य अपि तु विश्वस्यैव प्राचीना शिक्षाप्रणाली इति सर्वैः शिक्षाशास्त्रिभिः मुक्तकण्ठेन उद्घोष्यते । तत्रापि सम्पूर्णभारतस्य इतिहासः आचारविचारः जीवनपद्धतिः, संस्कृतिः, धर्मः, जनजातिः विशेषाश्च वेदेष्वेव विलसन्ति । प्राचीनकाले शिक्षायाः स्वरूपं विद्यायामृतमश्नुते, ऋते ज्ञानान्न मुक्तिः इत्येवंरूपेण आसीत् । तस्याः शिक्षायाः अध्ययनाध्यापनं प्राचीनकाले आधुनिककालापेक्षया किञ्चित् भिन्नमासीत् । छात्राः उपनयनसंस्कारानन्तरं शिक्षां प्राप्नुवन्ति स्म । तत्र गुरूः स्वाध्यायान्मा प्रमदः, धर्मं चर इत्येतादृशैः उपदेशवाक्यैः शिक्षणत्रिज्यं प्रारभ्यते स्म । वैदिकयुगः भारतीयसभ्यतायाः आरम्भात् बुद्धजन्मपर्यन्तं मन्यते विद्वद्भिः । प्राच्यकाले आर्यावर्तदेशे वैदिकी शिक्षाव्यवस्थाऽसीत् । वैदिकशिक्षाव्यवस्थायां वेदः सर्वेषां मूलम् । वेदः सर्वेषां ग्रन्थानां मूलमेवास्ति । अतः उक्तमस्ति वेदोऽखिलो धर्ममूलम् इति । उक्तञ्च यथा-अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।

आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।

प्राचीनकाले गुरूकुलेषु शिक्षा दीयते स्म । वैदिककाले वेदानामध्ययनं सर्वोपरि भवति स्म। वेदानामुच्चारणस्य ज्ञानं प्रदीयते स्म । वेदानामध्ययनं विहाय अनेकविषयाणामपि शिक्षा दीयते स्म । तत्र एक एव गुरूः सर्वान् छात्रान् शिक्षयति स्म । अतः ज्ञायते शिक्षा गुरूकेन्द्रिताऽसीत् । तस्मिन् समये शिक्षासत्रस्यावधिः पञ्चमासं यावत् आसीत् । शिक्षासत्रस्य प्रारम्भः श्रावणपूर्णिमायाम् भवति स्म । पुनः वैदिककाले निःशुल्कशिक्षा व्यवस्थाऽसीत् । दण्डव्यवस्थाऽपि आसीत् । गुरूः मधुरभाषया ज्ञानं दद्यात् इति ।

आचार्यः ब्रह्मचारिभ्यः सदाचारणस्य शिक्षां प्रदाय तस्य जितेन्द्रियत्वं पोषयति स्म । अस्मिन् समये स्त्रीणां कृते पृथगरूपेण शिक्षासंस्थायाः व्यवस्थाऽसीत् । तस्मिन् समये नारीणां कृते शिक्षा आसीत् । गुरूकुले स्थित्वाऽप्यध्ययनं कृतवत्यः स्त्रियः ।

उत्तमपरिवारस्य बालिकानां कृते नृत्यं गीतमित्यादीनां विषयाणां ज्ञानं दीयते स्म । निम्नपरिवारस्य बालिकानां कृते चित्रकला-साहित्य-वस्त्रवयन-पुष्पमाल्यनिर्माणकला इत्यादीनां ज्ञानं प्रदीयते स्म । काश्चन गणितादिशास्त्रेषु अपि प्रवीणाः आसन् ।

गुरूकुलशिक्षणपद्धतयः शिक्षाव्यवस्थायां प्राणभूतो विराजते । शिक्षणविधिरेव शिक्षणपरम्परां सूचयति । तेषु शिक्षणविधिषु मौखिकविधिः, प्रश्नोत्तरविधिः, व्याख्यानविधिः, सूत्रविधिः, इत्यादयः विधयः आसन् ।

वैदिककाले भारतीयशिक्षायाः विकासाय अनेकानि अभिकरणानि आसन्। तत्र गुरूगृहं, गुरूकुलं, आश्रमाश्च प्रमुखाः भवन्ति स्म। गुरूः स्वगृहे छात्रान् आहूय सर्वविधव्यवस्थां प्रदाय शिक्षां प्रददाति स्म। तथा च छात्राः स्वयमेव गत्वा तत्रस्थनियमानां पालनं कृत्वा विद्यार्जनं कुर्वन्ति स्म। अतः भारतीयशिक्षायाः परिप्रेक्ष्ये गुरूकुलानां पालनं कुर्वन्ति स्म। अपि च निर्धारितनियमानां सिद्धान्तानाञ्च पालनं कुर्वन्ति स्म। अनेकानां धार्मिकग्रन्थानां विकासः जायते स्म। गुरूः पितृतुल्य आसीत्। सः छात्रानुपदिश्य सामाजिककार्येषु प्रेरयति स्म, येन शिक्षाया उद्देश्यं तस्य पूर्तिः आनायासेन भवति स्म । अतः वक्तुं शक्यते यत् सामाजिकनैतिक-आध्यात्मिकगुणानां विकासे गुरूकुलानां महती भूमिका आसीत् वर्तते च । तस्मिन् समये सामाजिक-नैतिक-राजनैतिकोद्देश्यानां पूर्तये शिक्षा दीयते स्म । गुरूकुले या शिक्षाव्यवस्था प्रचलिताऽसीत् सा तदानीन्तनसमये वैज्ञानिकयान्त्रिक-सामाजिकबुद्धीनां विकासं करोति स्म । अतः आधुनिकयुगे शिक्षाव्यवस्थायां गुरूकुलानाम् उपादेयता, भूमिका, योगदानं, पृष्ठभूमिर्वा वर्तते एव ।

*****

# शिक्षकप्रशिक्षणम्

खुसिराम कटा
शि.शा. द्वितीयवर्षम्
अनुक्रमाङ्कः -18

अद्य सुदृढं सुसंकृतञ्च समाजं वयं अपेक्षामहे । एतादृशस्य समाजस्य निर्माणं कथं भवति इति चेत् सुनागरिकाणां निर्माणेन । सुनागरिकनिर्माणं तु शिक्षकेण भवति । किन्तु सर्वेऽपि शिक्षकाः भवितुं न शक्नुवन्ति । किमर्थमिति चेत् कश्चिद् पण्डितः स्यात् किन्तु सः यदि स्वकीयज्ञानस्य संक्रमणं कर्तुं न शक्नोति चेत् नास्ति तस्य ज्ञानं लाभाय, अतः सर्वं कर्तुं प्रशिक्षणमपेक्षते । तर्हि प्रशिक्षणं नाम किम् ? इति प्रश्नः उदेति बुद्धौ । तदानीं एवमुच्यते शिक्षाशास्त्रिभिः-

शिक्षणकौशलानि सम्पादयितुं या प्रक्रिया प्रयुज्यते सैव प्रक्रिया प्रशिक्षणमित्युच्यते । एवं प्रशिक्षणेन छात्राध्यापके शिक्षणकौशलानां विकासः भवति । येन कथं छात्रः पाठनीयः इति अवगच्छति सः। किन्तु एका जिज्ञासा अत्र उदेति यत् पाठनार्थं प्रशिक्षणम् नितरामावश्यकं वा ? किं प्रशिक्षणं विना अध्यापकः पाठयितुं न

शक्नोति वा ? यदि शक्नोति चेत् किमर्थं प्रशिक्षणम् ? यतो हि पुरा वसिष्ठादयः अपि प्रशिक्षणं विनैव महान्तः गुरवः सञ्जाताः । एवमेव बहूनि उदाहरणानि वर्तन्ते । केचन वदन्ति शिक्षणसामर्थ्यं वर्धयितुं प्रशिक्षणमपेक्षते । किन्तु तत् तु अभ्यासेन अनुभवेन वा वर्धते न तु प्रशिक्षणेन । तथापि अत्र वक्तुं शक्यते यत् प्रशिक्षणस्य आवश्यकता वर्तते एव । प्रशिक्षणेन विना उत्तमः शिक्षकः भवितुं नार्हति । यतः अस्माकं संस्कृतिः शिक्षाश्रिता वर्तते, अतः भारतीयसंस्कृतेः रक्षार्थमपि प्रशिक्षणस्यावश्यकता वर्तते ।

*****

# भारतस्य आत्मा संस्कृतम्

नाम- संजीब प्रधान

कक्ष्या- शि.शा.द्वि.व

अनुक्रमाङ्कः १९

अस्मिन् संसारे अनेकासां भाषाणां प्रयोगो भवति । तासु सर्वासु भाषासु संस्कृतभाषा सर्वोत्तमा विद्यते । संस्कारयुक्ता दोषरहिता परिष्कृतभाषा एव संस्कृतभाषा इति कथ्यते । इयमेव भाषा देवभाषा देववाणी, सुरवाणी, गीर्वाणवाणी इत्यपि उच्यते । एभिरपि अस्याः भाषायाः महत्वं परिवर्धते ।

भारतस्य संस्कृतिः संस्कृतादेव निस्सृता । अतः अद्यापि भारतवर्षम् अनया भाषया उपक्रियते । भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा । समिति उपसर्गपूर्वककृञ्धातोः स्त्रियां क्तिन्प्रत्यये सति संस्कृतिः इति पदं निष्पन्नं भवति । संस्कृतिमूलं संस्कृतम् । एषा संस्कृतिः न केवलं भारतदेशस्य अपि तु समग्रविश्वस्य मुकुटायमाना अस्ति ।

**संस्कृतं संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः ।**
**संस्कृते सकलं ज्ञानं संस्कृते किं न विद्यते ॥**

बालकस्य जननादारभ्य संस्कृतमाध्यमेन भारतीयसंस्कृतिः सुप्रतिष्ठिता अस्ति । संस्कृतभाषाया जातकर्मनामकरणान्नप्राशनादिषोडशसंस्कराः अनया एव भाषया विधीयन्ते । पूजापाठः यज्ञयागादिक्रियाश्च अस्यां भाषायामेव प्रचलन्ति । अस्माकं देशस्य विशिष्टपुरुषाणां विचाराः वेषभूषाः, कार्याणि, आचारः यथा तिलकधारणम् इत्यादि सर्वं संस्कृत्यनुगुणं वर्तते एव ।

संकृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः ।
वेदतत्वार्थसञ्जुष्टं लोकालोककरं शिवम् ॥

अतः वक्तुं शक्यते यत् संस्कृतिसंस्कृत्योः घनिष्ठः सम्बन्धः अस्ति । संस्कृतेः संरक्षणाय संस्कृतभाषा अनिवार्या । अस्माकं सभ्यता संस्कृतिश्च संस्कृतग्रन्थेष्वेव दरीदृश्यते । संस्कृतेन सह संस्कृतेः सम्बन्धः यदि विच्छिन्नो भवति तर्हि भारतीयसंस्कृतेः संरक्षणं न भवत्येव । अत एवोक्तम् –

संस्कृतेन सुसंपन्नं भारतं भारतमुच्यते ।
संस्कृतेन विना देशः केवलं चेन्डियोच्यते ॥

एवं संस्कृतभाषायाः अनेकप्रकारेण महत्वं दृश्यते । धर्मस्य आर्याणां पूर्वजानां च गौरवस्य रक्षा अवश्यं कर्तव्या । तर्हि संस्कृतस्य प्रचारः आवश्यकः । अधुना केवलम् इयं संस्कृतभाषा एव भारतस्य उन्नतिं कर्तुं समर्था दृश्यते । संस्कृतस्य खलु उन्नत्या अस्माकं सर्वेषाम् उन्नतिः सम्भवति । अतः संस्कृतभाषया एव व्यवहारः करणीयः ।

*******

# गुरुगौरवम्

भुवनेश्वर दास्
शिक्षाशास्त्रिद्वितीयवर्षम्
अनु.क्र.- 20

अनन्तं गुरूमाहात्म्यमतीवोपकृतिस्तथा ।
अन्तः चक्षुः समुन्मील्य ब्रह्म येनोपदेशितम् ॥

सच्चिदानन्दरूपं परं ब्रह्म ये साक्षात्कृतवन्तः तेषां गुरूणां महिमा असीमितो भवति । सत् गुरुः मम यत् उपकारं कृतववान् सोऽपि असीमित वर्त्तते । तेन कारणेन मम अपारशक्तेः ज्ञानचक्षुषः उद्घाटनं अभवत् , तदर्थं मम परमतत्वानां साक्षात्कारो जातः ।

भारतीयपरम्परायां गुरूणां वैशिष्ट्यं परिदृश्यते संसारेऽस्मिन् गुरूरेव हितैषी इति । ये गुरूजनानां चरणपंकजाः समर्पिताः भवन्ति, ते एव इह जगति श्रेष्ठाः भूत्वा मुक्तिपथम् अधिगच्छन्ति । अज्ञानात् मुक्तिं प्राप्नुवन्ति । अतः एव वेदे उक्तं -

"तमसो मा ज्योतिर्गमय" इति ।

गुरूणां कृपया दृष्टमनस्कः सज्जनो भविष्यति । कलिकालस्य प्रभावाद् लब्धानां दुष्टबलं शनैः शनैः विनश्यति । दुष्टजनोऽपि सज्जनत्वम् आप्नोति । भीरुरपि वीरत्वम् प्राप्नोति । अज्ञोऽपि सुधीस्थानं अधितिष्ठति । अतः उक्तं गुरुणां शक्तिरेवाऽद्वितीया इति । यथा -

तिष्ठतो गुरुगोविन्दौ पूर्वं कं प्रणमाम्यहम् ।
धन्यास्ते गुरुपादाश्च गोविन्दं येऽभ्यदर्शयन् ।।

मम सम्मुखे गुरु एवं गोविन्दौ स्तः , आदौ कं प्रणमामि अहम् ? मम गुरुं एव सर्वश्रेष्ठं प्रणमामि । करुणानिधि गुरुपादाः एव धन्याः यतः ते गोवोन्दं दर्शयन्ति ।

विज्ञो यस्य गुरुर्नास्ति शिष्यः परमूढधीः ।
अन्धौ तौ भ्रमतस्तत्र भवकूपे पतिष्यतः ।।

यस्य गुरु ज्ञानहीन अस्ति ,शिष्यश्च चिन्तनशक्तिविहीनः अस्ति तौ द्वावपि गुरुशिष्यौ अन्धाविव भ्रमन्तौ भवकूपे पतिष्यतः ।

व्रह्ममूल्यप्रदानाय किञ्चिन्नास्ति ममान्तिकम् ।
हृदये वर्तते कांक्षा तोषयामि कथं गुरुम् ॥

गुरुवर्यः मह्यं ओंम् - कार शव्दस्य अमूल्यनिधिं दत्तवान् । तेन समं किमपि वस्तु अथवा पदार्थः मम सविधे नास्ति । अतः अहं गुरुपादाय किम् अर्पयामि ? ओंम्- कारेण समं इह जगति किमपि वस्तु अथवा पदार्थ नास्ति इति हेतोः मया गुरुपादः कथम् तोषणीयः, तदुपायाश्च के इति अहं अविजानन् सतम्भीभूतो भवामि ।

पत्रं कृत्वा महीं कृत्स्नां लेखनीञ्च वनस्पतिम् ।
सप्तार्णवं मसिं कृत्वा गुरुगुणान्न पारये ॥

यदि सम्पूर्णं भूमण्डलं कागदं कृत्वा एवं समग्रवनस्पतिभ्यां लेखनी निर्मामि तथा सप्त समुद्रान् मसिं कृत्वा गुरुणां गुणगानं लिखामि चेद्ऽपि न्यूनं भवति । एवं रुपेण वर्त्तते गुरुगौरवम् अथात् गुरुणां गुणाः अपरिमिताः वर्त्तन्ते । अतः तस्मात् सर्वैः सर्वदा गुरूणां आज्ञाः पालनीयाः, गुरोः भक्तिश्च कत्तव्या ।

*****

# स्वाध्यायः

प्रशान्तः
शिक्षाशास्त्री - २
अनुक्रमाङ्क २१

विद्यार्थिजीवनं बहुमूल्यं जीवनं विद्यते अस्मिन् प्रपञ्चे । विद्यार्थिजीवनस्य ध्येयं विद्यार्जनमेव । विद्यार्जनं कथं कर्तुं शक्यते इत्युक्ते–

आचार्योपासनात् योगात् तपसा प्राज्ञसेवनात् ।
विभज्य कथनात् कालात् षड्भिः विद्या प्रपद्यते ॥

विद्यार्जने स्वाध्यायः एकम् अन्यतमं साधनम् अस्ति । वेदशास्त्रादीनां आदिनमध्ययनमेव स्वाध्यायः इति बहुभिः निष्णातैः उक्तम् । स्वाध्यायस्य परिपाटी आवैदिककालात् वर्तते इति महाभारते सूपपादितम् तद्यथा –

आहूताध्यायी गुरूकर्मस्वचोद्यः, पूर्वोत्थायी चरमं चोपशायी।
मृदुर्दान्तो धृतिमान् अप्रमत्तः, स्वाध्यायशीलः सिद्ध्यति ब्रह्मचारी॥

श्रीकृष्णेन अपि भगवद्गीतायां स्वाध्यायस्य उपरि बहु निर्णीतम्। तद्यथा –

"स्वाध्यायज्ञानयज्ञस्य यतयः संशितव्रताः" (४/२८)
"स्वाध्यायस्तप आर्जवम्" (१६/१)
"स्वाध्यायभ्यसनं चैव वाङमयं तप उच्यते" (१७/१५)

स्वाध्यायस्य अर्थः पुराणेषु वेदेषु **वेद** इत्यर्थः स्वीकृतः किन्तु साम्प्रतिककाले स्वाध्यायस्यार्थः स्वीयाध्ययनमेव।

**"स्वाध्यायोऽध्येतव्यः"** "स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्" इति श्रुतिवाक्यानि अपि लभ्यन्ते। अतः स्वाध्यायः अनिवार्यरुपेण जीवने करणीयः। स्वाध्यायशीलव्यक्तेः एव महान् व्यक्तित्वं भवति इत्यत्र नास्ति संशया कणिका। अतः जीवने क्रमबद्धतया, सुष्ठुतया स्वाध्याये सर्वेषां प्रवृत्तिः भवेयुरेव। अतः अस्माभिः एतद्दिशि प्रयत्नः अवश्यमेव विधेयः।

।।इति शिवम्।।

*****

# नैतिकशिक्षा

गणपतिभट्टः
अनुक्रमाङ्कः २४
शि.शा.द्वितीयवर्षम्

चतुरशीतिलक्षकोटिजीवजन्तुषु मानवः श्रेष्ठो वर्तते । तथापि तत्समूहे सर्वदा अशान्तिः परिलक्ष्यते । तत्र कारणं भवति मानवेषु नैतिकशिक्षायाः अभावः । किन्तु मानवाः शान्तिमेव इच्छन्ति । अतः साम्प्रतिके काले नैतिकशिक्षायाः आवश्यकता नितरामपरिहार्या वर्तते । नैतिकशिक्षा इत्युक्ते नीतियुक्ता शिक्षा अथवा नीतिमूलकशिक्षा इत्यर्थः । येन पाठ्यक्रमेण छात्रेभ्यः नीतिमूलकशिक्षा प्रदीयते सा शिक्षा नैतिकशिक्षा इत्यभिधीयते । अनया नैतिकशिक्षया छात्राः नीतिमयं जीवनं यापयितुं प्रेरणां लभन्ते । समाजे धर्मः प्रतिष्ठितो भवति । देशे च शान्तिशृङ्खला विराजते । नैतिकशिक्षायाः अभावः समाजस्य सकलदोषस्य दौर्बल्यस्य च कारणं भवति । नीतिनिष्ठजनाः अन्येभ्यः आदर्शभूताः भवन्ति ।

विद्यालये सामान्यतया बहुविधविषयाणां शिक्षाः दीयन्ते । तद्यथा – भाषा, विज्ञानम्, साहित्यम्, गणितम्, इत्यादयः । एतासु शिक्षासु मानवीयमौल्योपेतनैतिकशिक्षा नास्त्येव इति वक्तुं शक्यते । केवलं कृत्रिमरूपेण एतेषाम् अध्ययनं भवति तावदेव । अस्माकं पाठ्यक्रमः तस्य निर्मातारश्चापि नैतिकशिक्षां प्रभावपूर्णतया न बोधयन्ति । नैतिकशिक्षामन्तरेण व्यक्तिः केवलं शिक्षिता एव भवति । किन्तु व्यक्तिः मानवीयमौल्ययुतः सद्गुणसम्पन्नश्च नैव भवति । यथा इदानीन्तनकाले विध्वंसादिकृत्यादिषु बहवः आत्मानं व्यापारयन्ति सुशिक्षिता एव । यदि एते सुशिक्षिताः सुसंस्कारान् आदितः एव प्राप्नुवन्ति चेत् अस्मिन् समाजे अत्याचारानाचारभ्रष्टाचारादयः नैव सञ्जायन्ते स्म ।

नीतिशिक्षायां धर्मशिक्षायां च पार्थक्यं वर्तते । नीतिशिक्षा एकस्य निर्दिष्टमतवादस्य उपासना न भवति । एषा शिक्षा अस्मभ्यं सहनशीतलतायाः समदर्शितायाः सच्चारित्रतायाश्च शिक्षां प्रददाति ।

**नीतिशिक्षायाः स्थानानि -**

**परिवारः** – नीतिशिक्षायाः प्रथमं स्थानं भवति परिवारः । परिवारे मातापितरौ गुरुजनश्च यदि नीतिमन्तः भवन्ति तर्हि तेषां प्रभावः प्रतिफलति । यदि परिवारे विशृङ्खला, कपटता, अशिष्टाचारश्च दृश्यते तर्हि परिवारस्य शिशुः न कदापि शिष्टो भवेत् ।

**विद्यालयः** – नैतिकशिक्षायाः द्वितीयस्थलं भवति विद्यालयः । विद्यालये अध्यपकाः सर्वदा नीतिमन्तः भवेयुः । तैः सर्वदा छात्रेभ्यः नीतिशिक्षा प्रदातव्या । चरित्रनिर्माणस्य आधारस्तम्भो भवति विद्यालयः ।

**समाजः** – नीतिशिक्षायाः तृतीयस्थलं भवति समाजः । समाजेऽस्मिन् जना अपि ये नीतिमन्तः भवन्ति तेषामेव आदरं कुर्वन्ति । तानेव अनुसरन्ति च । समाजेऽपि नैतिकमौल्यानि अधिगन्तुं शक्यते । कदाचित् समाज एव अस्मान् नैतिकमूल्यानि पाठयति च ।

यदा विद्यालये शिक्षकाः बालानां कृते आदितः मानवीयमूल्योपेतनैतिकशिक्षां यच्छन्ति तदा एव छात्राणां सर्वाङ्गीणविकासः भवति । तेनैव उत्तमसमाजस्य निर्माणमपि जायते ।

*****

## बुद्धेः स्वरूपम्

रूपेश मोहान्त
शि.शा.द्वितीयवर्षम्
अनुक्रमाङ्कः २५

जीव्यवहारस्य अध्ययनं करोति मनोविज्ञानम् । यथा एकस्यां कक्षायां बहवः छात्राः वर्तन्ते परन्तु अध्ययनविषयेषु समरूपता न भवति । केचन मन्दाः, केचन बुद्धिमन्तः, केचन प्रसङ्गानुगुणं व्यवहर्तुं शक्याः केचित् अशक्ताः , केचित् विषयं शीघ्रं ज्ञातुं समर्थाः केचन विलम्बेन च ज्ञातुं समर्थाः सन्ति । शिक्षकः तु सर्वान् छात्रान् समानरूपेण एव शिक्षयति । परन्तु तेषां परिणामे भेदः दृश्यते । परिणामभेदस्य कारणम् भवति बुद्धिः ।

का नाम बुद्धिः ? तस्याः स्वरूपं किम् ? तस्याः स्वभावः कः ? प्रसङ्गे मनोवैज्ञानिकाः स्वीयमतं प्रकटितवन्तः । बुद्धिर्नाम न किमपि मूर्तवस्तु किन्तु क्रियात्मिका सा मानवस्य व्यवहारविशेषः ।

बुद्धेः परिभाषाः –

वुड्वोर्थ् – बुद्धेः ज्ञानार्जनस्य क्षमता अस्ति Intelligence is an acquiring capacity .

TERMAN- Intelligence is the capability to think in terms of abstract ideas. (भावात्मकविचाराणायनुरुपं चिन्तनक्रियायाः योग्यता एव बुद्धेः )

BINET – Comprehension , invention ,direction and criticism intelligence is contained in these four words .(ज्ञाने , अन्वेषणे , निर्देशने , आलोचनायां इत्येतेषु चतुर्षु शव्देषु बुद्धिः निहिता वर्तते)

BUKINGHAM – Intelligence is the ability to learn. (अधिगमसामर्थ्यमेव बुद्धिः)

न्यायशास्त्रे – सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् ।

बुद्धेः विशेषता –

- बुद्धिः मानवस्य मानसिकक्षमता वर्तते ।

- बुद्धिः जन्मजाता भवति ।
- बुद्धिः अमूर्तचिन्तनस्य योग्यता वर्तते या अप्रत्यक्षरुपेण परीक्षणीयास्ति ।
- बुद्धिः सा क्षमता वर्तते या सोद्देश्यविचारशीलरूपेण प्रदर्शिता भवति ।
- स्व – वातावरणेन समन्वयकरणस्य योग्यता वर्तते ।
- सामान्यविशिष्टौ चेति द्वयोः प्रकारयोः मानसिकप्रक्रियाणां द्योतिका वर्तते ।

**बुद्धेः स्वभावः** –

- बुद्धिः नूतनवातावरणे सामाञ्जस्यप्रक्रिया वर्तते ।
- बुद्धिः अधिगमसामार्थ्यं वर्तते ।
- बुद्धिः अमूर्तभावानां चिन्तनशक्तिः वर्तते ।
- बुद्धिशक्ति: सर्वासु मानवेषु समाना न भवति ।
- वंशानुक्रम: परिवेशश्च बुद्धिशक्तिं प्रभावयति ।
- बालकस्य वयसा बुद्धिशक्तिरपि वर्द्धते ।

बुद्धिसिद्धान्तानां प्रकारद्वयं वर्तते , **कारकसिद्धान्ताः संज्ञानात्मकसिद्धान्ता**श्चेति । कारकसिद्धान्तेषु एककारकसिद्धान्तस्य प्रवर्तकः टर्मन् महोदयः । द्विकारकसिद्धान्तस्य प्रवर्तकः स्फियर्मन इत्याख्यः । बहुकारकसिद्धान्तस्य प्रवर्तकः थार्नडैक् महोदयः । बहुकारकसिद्धान्तस्य प्रवर्तकः थर्सटन् ।

**संज्ञानात्मकसिद्धान्ताः**

- केटिलमहोदयस्य बुद्धिसिद्धान्तः (आर्.बि.क्याटल् – १९६३) अ) द्रवबुद्धिः) धनबुद्धिः ।
- पियाजेमहोदयस्य संज्ञानात्मकविकाससिद्धान्तः ( जान् पियाजे -१९७०)
- स्टेन्-बर्गमहोदयस्य त्रितन्त्रसिद्धान्तः

  १. सान्दर्भिक उपसिद्धान्तः

  २. अनुभवजन्य-उपसिद्धान्तः

  ३. घटक-उपसिद्धान्तः

**बुद्धेः प्रकाराः -**

थार्नडाइकमहोदयेन त्रिधा बुद्धिः बिभक्ता । यथा – अमूर्तबुद्धिः, मूर्तबुद्धिः, सामाजिकबुद्धिः चेति ।

**बुद्धिलब्धिः -**

बिने महोदयस्य बुद्धिपरीक्षा स्टॅन् महोदयस्य संख्यात्मकरूपं प्रदातुं प्रयत्नमकरोत् । १९१२ तमे वर्षे सः बुद्धिलब्धिः (I.Q) इति नूतनसम्प्रत्ययं प्रत्यपादयत् । इयं परीक्षा अनन्तरं Stanford Binet intelligence test इति नाम्ना सुप्रसिद्धम् ।

**बुद्धिलब्धिः = मानसिकवयः/शारीरिकावयः X 100**

| बुद्धिलब्धिः I.Q | बुद्धिस्तरः Level of Intelligence |
|---|---|
| 140 तः अधिका | प्रतिभावान् |
| 120 to 140 | अधिकबुद्धिमान् |
| 110 to 120 | बुद्धिमान् |
| 90 to 110 | सामान्यबुद्धिमान् |
| 75 to 90 | अल्पबुद्धिमान् |
| 50 to 75 | मूर्खः |
| 25 to 50 | मूढः |
| 25 तः न्यानाः | जडबुद्धिः |

बुद्धिपरीक्षणस्य आवश्यकता

१. शैक्षिकप्रयोजनानि
२. व्यावसायिकप्रयोजनानि
३. सैन्यक्षेत्रे प्रयोजनानि
४. अनुसन्धानक्षेत्रे प्रयोजनानि

शिक्षाक्षेत्रे बुद्धिपरीक्षायाः आवश्यकता

- प्रवेशप्रक्रियायां छात्राणां चयनम् ।
- प्रवेशानन्तरं छात्राणां वर्गीकरणम् ।
- प्रतिभावतां मन्दमतीनाञ्च अभिज्ञानम् ।
- छात्राणां मानसिकस्वास्थ्यस्य अभिज्ञानार्थम् ।
- छात्रेभ्यः शैक्षिक – व्यवसायिकमार्गदर्शनम् ।
- छात्रवृत्तये योग्यच्छात्राणां चयनम् ।
- पाठ्यक्रमस्य चयनम् ।

- छात्राणां कक्षोन्नतिः ।
- छात्रेभ्यः योग्यशिक्षणोपकरणानां चयनम् ।

*****

# "धर्मेण हीनाः पशुभिः समानाः"

**रमेशः बी,सी**
**शिक्षाशास्त्रिद्वितीयवर्षम्**
**अनुक्रमाङ्कः २७**

"धृञ्" धारणपोषणयोः इत्यस्माद् धातोः औणादिके "मन्" प्रत्यये कृते धर्मशब्दो निष्पद्यते । वेदः कथयति यत् धर्मोऽयं अलौकिकशक्तेः बोधकः इति । ऋग्वेदस्य मतानुसारं धर्मः नियमव्यवस्थायाः द्योतको भवति । अथर्ववेदे धर्मशब्दस्यार्थो भवति पुण्यम् । महाभारतानुसारं धारणादेव धर्मः इत्यर्थः । तद्यथा-

**"धारणाध्दर्म इत्याहुः धर्मो धारयते प्रजाः"॥**

वस्तुतः येन माध्यमेन लोकानां धारणं सम्भवेत् यश्च लोकानां सुनिर्वाहार्थं संसारं धारयेत् स एव धर्मशब्दवाच्यः । भगवता मनुना धर्मस्य दशलक्षणानि वर्णितानि तानि यथा-

**"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।"**

एतानि दशलक्षणानि वस्तुतः जीवनस्य उन्नायकानि । समाजस्य उत्थापकानि जनमानसहृद्यानि लोककल्याणसाधनानि विश्वशान्तिस्थापकानि च । धर्ममाध्यमेन मनुष्यः सुखं प्राप्य मोक्षं प्राप्नोतीति नास्ति संदेहः ।

यो धर्मं चरति विपत्तावपि च धर्मं न त्यजति, धर्मस्तं सततं रक्षति । अतः धर्मो न हातव्यः न च हन्तव्यः सततं च रक्षितव्यः । अतः भगवता मनुना उक्तं यत् –

**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।**
**तस्माध्दर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ॥**

आहार-निद्रा-मैथुनादिकं तु मनुष्येषु पशुषु चोभयोरपि समानमेव । मनुष्येषु धर्म एव एक एतादृश गुणः येन ते पशूनामपेक्षया उत्तमाः श्रेष्ठश्च कथ्यन्ते । अथैव धर्मशून्याः जनाः पशुतुल्या एव । प्रसङ्गेऽस्मिन् हितोपदेशो उपदिशति-

**"आहारनिद्राभयमैथुनं च समान्यमेतत् पशुभिर्नराणम् ।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः" ॥**

*****

## ॥ शाकुन्तलस्य श्लोकचतुष्टये जीवनशिक्षणम् ॥

बालचन्द्रभट्टः
शिक्षाशास्त्रिद्वितीयवर्षम्
अनुक्रमाङ्कः –३१

अस्माकं मित्रैः सह वार्तालापकरणावसरे विषयः यदा संस्कृतसाहित्यप्रपञ्चं प्रविशति,तदा अयत्नपूर्वकं वा कालिदासस्य नाम नूनं मुखान्निस्सरति । यतो हि कालिदासकृतकृतीनां संख्या अङ्गुलिमेया सत्यपि तासां कृतीनां गुरुतां न मेरुरपि विन्दति । सा च गुरुता कालिदासकृतीनामालोडनेन नूनं सहृदयैः प्रतिपदम् अनुभूयते ।

कालिदासकाव्यसरसि निमज्जद्भिः सहृदयैः पुनःपुनः घ्राणीयं कृतिपद्मं भवति अभिज्ञानशाकुन्तलम् । अस्य कथा तु सुप्रसिद्धैव । अस्मिन्नाटके चतुर्थेऽङ्के विद्यमानाः चत्वारः श्लोकाः कण्वमुखप्रसृताः अतीव सुमनोहराः । अत एव उक्तम् –

काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥

अस्मिन् श्लोकचतुष्टये न केवलं मनोहरत्वम्,सहृदयहृद्यत्वम्, किन्तु जीवनस्य यापनं कथं भवेदिति शिक्षणमपि उपदिष्टमस्तीति विशेषः । यथा कृष्णः अर्जुनं निमित्तीकृत्य लोकहिताय गीतामुपदिदेश, तथैवात्र कालिदासः कण्वमुखेन शकुन्तलां निमित्तीकृत्य लोकाय जीवनशिक्षणमुपदिदेश । ते चोपदेशाः के इति चतुष्टये एकैकं श्लोकं स्वीकृत्य विचारयामः ।

कण्वः स्वपालितपुत्रीं शकुन्तलायाः पतिगृहं प्रति प्रेषणावसरे एवं चिन्तयति –

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैः नवैः ।।

"न केवलम् अस्माकं किन्तु चिरं पालितमपि वस्तु त्यागावसरे महान्तं शोकं जनयति जनानाम् । तन्निर्जीवं वा सजीवं वा भवतु । अहं सर्वं सहे, संन्यासी अस्मि, विरागी चास्मि इति चिन्तयामश्चेदपि त्यागकाले एव तस्य वैराग्यस्य परीक्षणं सम्भवति । अतः तादृशं वस्तु यद्वा भवतु, अस्मान् विहाय गच्छत्येव । अतः अस्माकं मनोनिर्धारः अचलो भवेत् । तदैव किमपि साधयितुं शक्नुमः"इति अनेन श्लोकेन वयं सन्देशं प्राप्नुमः ।

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।

आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।।

कण्वः शकुन्तलायाः पतिगृहं प्रति प्रेषणावसरे तपोवनतरुभ्यः इमानि वचांसि वदति । अनेन ज्ञायते यत्, तरुषु शकुन्तलायाः यादृशः घनिष्ठः स्नेहः आसीदिति । अतः तादृशस्नेहदर्शिका इदानीं गन्तास्ति । अतः तस्यै अनुमतिं प्रयच्छत इति कण्ववचोऽभिलाषः ।

किन्त्वत्र गाढस्नेहवत्सु जनेषु अस्माकं व्यवहारः कथं भवेदिति सूचितमस्ति । वयमिह जगति यान् यान् विषयान् उपभुञ्ज्महे तान् अस्मदीयैः सह भुञ्जीमहि । अथवा तेभ्यः प्रदाय ततः परम् अस्माभिः स्वीकर्तव्यम् । अस्माकं प्रीतिकरमपि कार्यम् अस्मन्मित्राणां क्लेशोत्पादकं भवति चेत् सर्वथा निवारणीयम् । अपि च अस्मदीयजनानामभ्युदयं स्वाभ्युदयमिव सन्तोषेण समाचरेत् इति सामान्या नीतिः श्लोकेऽस्मिन् निगूहिता वर्तते ।

अस्मान् साधु विचिन्त्य संयमधनानुच्चैःकुलं चात्मनः
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ।।

अत्र कण्वः दुष्यन्ताय शकुन्तला कथं पालनीयेति आज्ञापयति । अत्रापि जीवनशिक्षणं निरूपितं दृश्यते । अपरिचितपुरुषैः सह अथवा अविचार्यकृतकार्येषु उत्तमजनाः यथा अविथतं नाचरन्ति तथैव अस्माभिः अविचार्य निर्णयः न स्वीकर्तव्यः । तत्र पौनःपुन्येन परिशीलनम् अपेक्ष्यते । क्वचित् सामान्यजनाः (भृत्यजनाः) दोषान् आचरन्ति चेदपि तेषां क्षमाप्रादाना धीः महतां शोभते । अतः तथैव अस्माकम् अपि व्यवहारः भवेदिति । अपि च अस्माकमुपजीविषु समाना दृष्टिः भवेत् । पक्षपातः न कर्तव्यः इति अनेन श्लोकेन सूचितम् ।

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।

अत्र युवतिभिः पतिगृहे कथं व्यवहर्तव्यमिति विस्तरेण उपदिशति कण्वः । अनेन श्लेकेन न केवलं युवतीनां किन्तु सर्वेषामुपदेशः लभ्यते । गुरूणां शुश्रूषा निःस्पृहेण कर्तव्या भवति । स्वस्य व्यवहारमित्रैः सह प्रीतिः प्रदर्शनीया न तु क्रोधः । कदाचित् अस्मत् उन्नतजनः कोपेन किमपि अन्यथा भर्त्सनं करोति चेदपि सहसा

कमपि निर्णयं न स्वीकुर्याम । कदाचित् सहिष्णुतैव श्रेयसे भवत्यस्माकम् । यावत्साध्यं सरलता जीवने भवेत् । अहङ्कारः दर्पश्च अस्मानेव नाशयति ।

क्वचित् भाग्यानुसारं परमं पदं लभ्यते चेत् तेन अभिमानः न प्रदर्शनीयः । एवं जीवने व्यवहरामश्चेत् सतां पङ्क्तौ अस्माभिरपि स्थातुं शक्येत । अन्यथा लोके कण्टकसमानाः भवेम इति जागरयति इदं पद्यरत्नम् ।

तदेवं अभिज्ञानशाकुन्तलस्य श्लोकचतुष्टयं सम्यग्यदि वयम् अभ्यस्य अर्थानुसन्धानं कृत्वा जीवने पालयामः तर्हि महत्परिवर्तनं जयते । जीवनशिक्षणं च अनितरसाधारणं प्राप्यते इति निश्चप्रचं वक्तुं प्रभवामः।

*****

## वैदिककालीन शिक्षणविधयः

प्रदीप कुमार साहू
शि.शा.द्वितीयवर्षम्
अनुक्रमाङ्कः- 32

वेदस्य अन्तिमभागे तन्नाम उपनिषत्सु शैक्षिकविचाराः स्फुटतया दृश्यन्ते । विभिन्नशिक्षणविधिना प्रयोगः च परिदृश्यते । तत्र प्रामुख्येन यथा-सूत्रविधिः, निरुक्तविधिः, आख्यायिकाविधिः, उपमानविधिः, संवादविधिः, समन्वयात्मकविधिः, विश्लेषणविधिः, देवज्ञानविधिः, इत्यादयः प्रसिद्धाः।

**सूत्रविधिः-**

वैदिककाले सूत्रविधिः अत्यन्तं प्रसिद्धः आसीत् । अत्र अल्पाक्षरेणैव सर्वं सूत्रेषु निरूप्यते यथा- "अथातो ब्रह्म जिज्ञासा" ।

**निरूक्तविधिः-**

अयं वेदोक्तशब्दानाम् अर्थविश्लेषणाय उपयुज्यते स्म । यथा परुषः - पुरि देहे शेते(निवसति) इति पुरुषः।

**आख्यायिकाविधिः-**

अयं विशिष्टविधिः वर्तते । वेदस्थानां गभीरविषयाणां सरलरूपेण कथामुखेन वा निरूपयितुम् अयं विधिः उपयुज्यते स्म । यथा - छान्दोग्योपनिषदि विद्यमाना इन्द्रविरोचना आख्यायिका आत्मनः ज्ञानाय साहाय्यमाचरति ।

**उपमानविधिः**-

साद्दश्यमुखेन परमतत्वबोधनाय अयं विधिः उपयुज्यते स्म । यथा- सुपुत्राय श्वेतकेतवे जीवब्रह्मणोः संबंधबोधनाय पित्रा आरुणिना उपमानविधिः प्रयुक्ता (लवण सिद्धान्तः)।

**संवादविधिः**-

उपनिषत्सु अत्यन्तं प्रसिद्धः विधिः एषा संवादमुखेनदार्शनिक तथ्यानां प्रतिपादननमत्र क्रियते । यथा- बृहदारण्यकोपनिषदि "याज्ञवल्क्यमैत्रेयी" संवादः, कठोपनिषदि यमनचिकेतसोः संवादः, छान्दग्योपनिषदि आरुणिश्वेतकेतुसंवादः, नारदसनतकुमार संवादः इत्यादिः ।

**समन्वयात्मकविधिः**-

इतस्ततः प्रकीर्णानां सिद्धान्तानां एकत्रीकरणम् यथा- छान्दोग्योपनिषदि सृष्टिविज्ञानसंबद्धा षद्विद्धान्ताः कैकेयद्वारा समन्वयात्मकदृष्ट्या निरूपिताः सन्ति ।

**विश्लेषणविधिः**-

दार्शनिकसमस्यानां खण्डशः विभाजनं कृत्वा विश्लेषणं च यथार्थं पाप्नुवन्ति स्म। उदाहरणार्थं कारणवादस्य विश्लेषणेन अकारणस्य आत्मनः प्राप्तिर्जायते ।

**देवज्ञानविधिः**-

बह्वीषु उपनिषत्सु देवताभिः ऋषिभ्यः ज्ञानराशिः प्रदत्ताः इति ज्ञायते । उदाहरणार्थं तैत्तरीयोपनिषदि वरूणदेवः भृगुनामकाय ऋषये ज्ञानमयच्छत् । एवमेव छान्दग्योपनिषदि अग्निदेव सत्यकामजाबालाय ज्ञानमदात् इति ज्ञायते । एवम् उक्ताः अनुक्ताः वा बहवः शिक्षणविधयः वैदिककाले आसन् इति स्पष्टम् ।

*****

## छात्राणामध्ययनं तपः

मधुस्मिता त्रिपाठी
कक्ष्या-शि.शा.द्वितीयबर्षम्
अनुक्रमाङ्-38

भारतवर्षे वर्णानामाश्रमाणाञ्च माहात्म्यं वर्तते । सर्वाणि शास्त्राणि वर्णाश्रमाणां माहात्म्यं अङ्गीकुर्वन्ति । मनुस्मृतिः समाजं ब्राह्मण-क्षत्रिय-वैश्य-शूद्राख्येषु वर्णविभागेषु जीवनञ्च ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यासाख्येषु आश्रमेषु विभज्य तेषां आचरणानुदेशनं करोति । तत्र ब्रह्मचर्याश्रमः जीवनस्य प्रथमं चरणं आस्ते । अस्यामवस्थायाम् जीवनमुन्नत्योन्मुखं भवति । शरीरं वर्द्धते । शरीरस्य सर्वे अवयवाः वर्द्धन्ते । बुद्धिरत्यन्तं

तीक्ष्णा भवति । यादृशाः संस्काराः अस्यामवस्थायामधीयन्ते तादृशमेव जीवनं सम्पूर्णं भवति । अत एव भारतीयमनीषिभिः एका व्यवस्था सम्पादिता अध्ययनाध्यापनयोर्विधेः । तथा च श्रुतिः- "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" मनुः अपि मनुस्मृतौ एवं कथयति ।

वेदा अपि ब्रह्मचर्यावस्थायां अध्ययनस्यावश्यकतां प्रतिपादयन्तो वदन्ति "स्वाध्यायोऽध्येतव्यः" इति । इत्थं शास्त्रवचनानि जीवनस्य महति प्रत्यूषे काले पालयन् मानवः तपस्येव तपति । भगवान् श्रीकृष्णः अध्ययनस्य तपस्स्वरूपतां प्रत्यपादयन् वक्ति - "स्वाध्यायभ्यासनं चैव वाङ्मयं तप उच्यते । "भगवान् मनुः द्विजानां परमं कर्तव्यं वेदानामभ्यसनमेवाह –

"योऽनधीत्य द्विजो वेदमन्यत्र कुरूते श्रमम् ।
सजीवन्नैव शूद्रत्वमाशु गच्छति सान्वयः ।।"

एतेन विवेचनेन ज्ञायते यत् छात्रावस्थायामध्ययनमेव परमं तपः । तपो हि नाम ब्राह्याभ्यन्तराणि सर्वाणि इन्द्रियाणि संयम्य स्वलक्ष्यप्राप्तये कृतमनुष्ठानमेव । अनेन अध्ययनरूपेणानुष्ठानेनापि लक्ष्यभूतस्य ज्ञानस्य प्राप्तिर्भवति । अस्याध्ययनस्य आजीवनम् आवश्यकता भवति । अध्ययनादेव एषां महर्षिणां वाल्मीकि-व्यास-पाणिनि-पतञ्जलि-कात्यायन-कालिदास-भारवि-माघ-बाणभट्टप्रभृतीनां विदुषां गौरवो विश्वेऽस्मिन् विख्यातोऽस्ति । इत्थमध्ययनं छात्रजीवनस्य परमं तपो वर्तते । यस्य फलम् आजीवनं भुङ्क्ते छात्रः। अत एव छात्रैः सदा जागरूकतयाध्ययनं कर्तव्यम् ।

*****

# अनेकान्तवादः

विनोद् कुमार जैनः
शि.शा.द्वितीय वर्षम्
अनुक्रमाङ्कः- 40

अयं जैनदर्शनस्य प्रमुखः सिद्धान्तः अस्ति । अनेक इति शब्दस्यार्थः बहु इति अन्तः इति शब्दस्यार्थः धर्मः अथवा गुणः इति च भवति । वादशब्दस्यार्थः कथनमिति । एकस्मिन्नेव वस्तुनि अनेके धर्माः तिष्ठन्ति । एतेषां समेषां धर्माणां वाचकः अनेकान्तवादः अस्ति । अनेकगुणनिष्ठं वस्तु तत्रस्थानि सर्वाणि गुणान्तराण्यपि निषिध्य एकेनैव गुणेन ज्ञातुं शक्यते । एकैव गुणदृष्ट्या नैव ज्ञातुं शक्यते । वस्तु सर्वाभिः संभवदृष्टिभिः वस्तुनः ज्ञानमेव अनेकान्तवादः। वक्ता कस्यचित् वस्तुनः अनेकगुणेषु एकमेव गुणं एकदा कथयितुमर्हति, तत्समये

अन्यगुणाः गौणरूपेण भवन्ति । एवं एकमेव वस्तु बहुरूपेषु भवति । तस्य कथनप्रकारः पृथक् पृथक् अस्ति यत् स्याद्वादनाम्ना प्रथितः । यथोदाहरणम् -

एकः जनः कस्यचित् पुत्रः, कस्यचित् पिता, कस्यचित् भ्राता, कस्यचित् पतिः वर्तते । एवमेव सः एव जनः विविधरूपेषु दृश्यते । पितुः दृष्टया सः पुत्रः वर्तते, पत्न्याः दृष्टया स एव जनः पुत्रः नास्ति, अर्थात् एकस्य दृष्टया सः यः अस्ति, अन्यस्य दृष्टया सः तद्रूपे नास्ति । इत्थं प्रत्येकं वस्तु एकस्मिन्नेव समये अस्तिरूपं नास्तिरूपञ्च वर्तते । अर्थात् तदेव वस्तु एकदृष्टया अस्तिरूपं अपरदृष्टया तदेव वस्तु नास्तिरूपमपि अस्ति । अतः लोके यत्किमपि अस्ति तत् कस्यचित् अन्यदृष्ट्या नास्त्यपि । सर्वथा सत् अथवा सर्वथा असत् किमपि वस्तु अथवा द्रव्यं नैवावगन्तव्यम् । कस्यापि वस्तुनः अस्तिरूपं केवलं तस्य वस्तुनः सत्-गुणकारणेन न अपि तु अन्यवस्तुनः नास्ति कारणेनाप्यस्ति । यथा- वस्त्रमेतदर्थं वस्त्रं नास्ति यत् तस्मिन् वस्त्रस्य अस्तिरूपेण सह घटस्य च नास्तिरूपमप्यस्ति । वस्तु सर्वदा नित्यमनित्यं वा भवति, एवमेकान्तवादस्य निराकर्ता अनेकान्तवादः।

*****

# गुरुः

शैलजा नन्दिनी जेना
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः-42

भारतीयसंस्कृतौ तथा सनातनपरम्परायां प्राचीनकालादेव मातृदेवो भव, पितृदेवो भव, आचार्य देवो भव इत्याद्युपदेशवाक्यैः मातुः, पितुः, गुरोश्च आदरः देवानामिव क्रियते । रामायणे, महाभारते, उपनिषत्सु इत्यादिग्रन्थेषु वहूनि उदाहरणानि, प्रमाणानि अस्मिन् सन्दर्भे द्रष्टुं शक्यन्ते । गुरोः स्थानं अस्माकं भारतीयसंस्कृतौ देवताभिः सह समानं कल्पितम् । अतः गुरूर्नाम परमेश्वरः इत्येव आयाति । अर्थात् परब्रह्मणः , ज्ञानस्य आदरस्य च पूजनमित्यर्थः। यथोक्तम् गिरति अज्ञानान्धकारम् इति गुरुःइत्येनेन वाक्येन यः स्वसदुपदेशैः शिष्यस्य अज्ञानयुक्तम् अन्धकारं निवारयति सः गुरुः भवति ।" तथैव मनुना उक्तम् –

"निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चात्तेन स विप्रो गुरुरुच्यते ॥"

(मनुस्मृतिः -2/42)

अध्यात्मपिता भूत्वा गुरुः शिष्यस्य संस्कारान् शास्त्ररीत्या कारयति तथा च अन्नादिमाध्यमेन शिष्यस्य जीवनं पोषयति। अनेन गुरोः स्थानं शिष्याणां जीवने श्रेष्ठतमं आदर्शरुपं श्रद्धान्वितञ्च भवति। तथा च गुरुं साक्षात् परमेश्वररुपेण शिष्याः मनसा कर्मणा च पूजयन्ति। यथोक्तम्-
"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।"

